M. T. B. COLLEGE, SURAT
Manuscripts Library

No Ref.
Ser. 392+

Title: Paribhashavali
392A + B + C

392

परिभाषावली:

Pāribhāshāvali.		Title
Mahāmahopādhyāya Vishwa		Author
-nātha Bhatta		Editor
1705 (Śaka ?)		Year, Vols.
		Publisher
392 +		Remarks

392a, + b + c.

श्रीगणेशायनमः नूतनजलधररुचये गोपवधूटीदुकूलचौराय तस्मैकृष्णायनमः संसारमहीरुहस्यबीजाय १ द्रव्यं
मु॰का॰ गुणास्तथाकर्मसामान्यंसविशेषकं समवायस्तथाभावः पदार्थाः सप्तकीर्तिताः २ क्षित्यप्तेजोमरुद्व्योमकालदिग्दे
१ हिनोमनः द्रव्याण्यथगुणारूपंरसोगंधस्ततःपरं ३ स्पर्शःसंख्यापरिमितिः पृथक्त्वंचततःपरं संयोगश्चविभागश्चपरत्वंचापर
त्वकं ४ द्रवत्वंस्नेहसंस्कारावदृष्टंशब्दएवच बुद्धिःसुखंदुःखमिच्छाद्वेषोयत्नोगुरुत्वकं ५ उत्क्षेपणंततोपक्षेपणमाकुंचनंतथा
प्रसारणंचगमनंकर्माण्येतानिपंचच ६ भ्रमणंरेचनंस्पंदनोर्ध्वज्वलनमेवच तिर्यग्गमनमप्यत्रगमनादेवलभ्यते ७
सामान्यंद्विविधंप्रोक्तंपरंचापरमेवच द्रव्यादित्रिकवृत्तिस्तुसत्तापरतयोच्यते ८ परभिन्नातुयाजातिःसैवापरतयोच्यते
द्रव्यत्वादिकजातिस्तुपरापरतयोच्यते व्यापकत्वात्परापिस्याद्व्याप्यत्वादपरापिच अंत्योनित्यद्रव्यवृत्तिर्विशेषःपरिकीर्तितः १०
घटादीनांकपालादौद्रव्येषुगुणकर्मणोः तेषुजातेश्चसंबंधःसमवायःप्रकीर्तितः ११ अभावस्तुद्विधासंसर्गान्योन्याभाव
भेदतः प्रागभावस्तथाध्वंसोप्यत्यंताभावएवच १२ एवंत्रैविध्यमापन्नःसंसर्गाभावइष्यते सप्तानामपिसाधर्म्यंज्ञेयत्वादि

कमुच्यते १३ द्रव्यादयःपंचभावास्त्वनेकेसमवायिनः सत्तावंतस्त्रयस्त्वाद्यागुणादिर्निर्गुणोक्रियः १४ सामान्यपरिहीना
स्तुसर्वेजात्यादयोमताः पारिमांडल्यभिन्नानांकारणत्वमुदाहृतं १५ अन्यथासिद्धिशून्यस्यनियतापूर्ववर्तिता कारण
त्वंभवेत्तस्यत्रैविध्यंपरिकीर्तितं १६ समवायिकारणत्वंज्ञेयमथाप्यसमवायिहेतुत्वं एवंन्यायनयज्ञैस्तृतीयमुक्तंनिमित्त
हेतुत्वं १७ यत्समवेतंकार्यंभवतिज्ञेयंसमवायिकारणंतत् तत्रासन्नंजनकंद्वितीयमाभ्यांपरंतृतीयंस्यात् १८ येनसह
पूर्वभावःकारणमादायवायस्य अन्यंप्रतिपूर्वभावेज्ञातेयत्पूर्वभावविज्ञानं १९ जनकंप्रतिपूर्ववर्तितामपरिज्ञायन
यस्यगृह्यते अतिरिक्तमथापियद्भवेन्नियतावश्यकपूर्ववर्तिनः २० एतेपंचान्यथासिद्धादंडत्वादिकमादिमं घटादौ
दंडरूपादिद्वितीयमपिदर्शितं २१ तृतीयंतुभवेद्व्योमकुलालजनकोपरः पंचमोरासभादिःस्यादेतेष्वावश्यकस्त्वसौ
२२ समवायिकारणत्वंद्रव्यस्यैवेतिविज्ञेयं गुणकर्ममात्रवृत्तिज्ञेयमथाप्यसमवायिहेतुत्वं २३ अन्यत्रनित्यद्रव्येभ्य
आश्रितत्वमिहोच्यते क्षित्यादीनांनवानांतुद्रव्यत्वंगुणयोगिता २४ क्षितिर्जलंतथातेजःपवनोमनएवच परापरत्वमू
र्तत्वक्रियावेगाश्रयाअमी २५ कालखात्मदिशांसर्वगतत्वंपरमंमहत् क्षित्यादिपंचभूतानिचत्वारिस्पर्शवंतिहि २६

मु.का. द्रव्यारंभश्चतुर्षुस्यादथाकाशशरीरिणां अव्याप्यवृत्तिः क्षणिकोविशेषगुणइष्यते २७ रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः
गुरुणीद्वेरसवती द्वयोर्नैमित्तिकोद्रवः २८ आत्मानोभूतवर्गाश्च विशेषगुणयोगिनः यदुक्तंयस्यसाधर्म्यं वैधर्म्यमित
रस्यतत् २९ स्पर्शादयोष्टौवेगाख्यः संस्कारोमरुतोगुणाः स्पर्शाद्योष्टौरूपंचद्रवोवेगश्चतेजसि ३० स्पर्शादयो
२ ष्टौवेगश्चद्रवत्वंचगुरुत्वकं रूपंरसस्तथास्नेहोवारिण्येतेचतुर्दश ३१ स्नेहहीनागंधयुक्ताः क्षितावेतेचतुर्दश बुध्यादिषट्कं
संख्यादिपंचकंभावनातथा ३२ धर्माधर्मौगुणाएते आत्मनस्तुचतुर्दश संख्यादिपंचकंकालदिशोःशब्दश्चतेचखे ३३ संख्या
द्यः पंचबुद्धिरिछायत्नोपिचेश्वरे परापरत्वेसंख्यादिपंचवेगश्चमानसे ३४ वायोर्नवैकादशतेजसोगुणाजलक्षितिप्राणभृतां
चतुर्दश दिक्कालयोःपंचषडेवचांबरे महेश्वरेष्टौमनसस्तथैवच ३५ तत्रक्षितिर्गंधहेतुर्नानारूपवतीमता षड्विधस्तुरसस्त
त्रगंधस्तुद्विविधोमतः ३६ स्पर्शस्तस्यास्तुविज्ञेयोह्यनुष्णाशीतपाकजः नित्यानित्याचसाद्वेधानित्यास्यादणुलक्ष २
णा ३७ अनित्यातुतदन्यास्यात्सैवावयवयोगिनी साचत्रिधाभवेद्देहइंद्रियंविषयस्तथा ३८ योनिजादिर्भवेद्देहइं
द्रियघ्राणलक्षणं विषयोद्व्यणुकादिःस्याद्ब्रह्मांडांतउदाहृतः ३९ वर्णःशुक्लोरसस्पर्शौ जलेमधुरशीतलौ स्नेहस्तत्र

द्रवत्वंतुसांसिद्धिकउदाहृतः ४० नित्यत्वादिप्रथमवत्किंतुदेहमयोनिजं इंद्रियंरसनंसिंधुर्हिमादिर्विषयोमतः ४१ स्पर्शउष्णस्ते
जसस्तुस्याद्रूपंशुक्लंभास्वरं नैमित्तिकंद्रवत्वंतुनित्यतादिचपूर्ववत् इंद्रियंनयनंवह्निःस्वर्णादिर्विषयोमतः ४२ अपाकजोनुष्णाशीतःस्प
र्शस्तुपवनेमतः तिर्यग्गमनवानेषज्ञेयःस्पर्शादिलिंगकः ४३ पूर्ववन्नित्यताद्युक्तं देहव्यापित्वगिंद्रियं प्राणादिस्तुमहावातपर्यंतोविष
योमतः ४४ आकाशस्यतुविज्ञेयःशब्दोवैशेषिकोगुणः इंद्रियंतुभवेछ्रोत्रमेकःसन्नप्युपाधितः ४५ जन्यानांजनकःकालोजगतामाश्र
योमतः परापरत्वधीहेतुःक्षणादिःस्यादुपाधितः ४६ दूरांतिकादिधीहेतुरेकानित्यादिगुच्यते उपाधिभेदादेकापिप्राच्यादिव्यपदेशभाक्
४७ आत्मेंद्रियाद्यधिष्ठाताकरणंहिसकर्तृकं शरीरस्यनचैतन्यंमृतेषुव्यभिचारतः ४८ तथात्वंचेदिंद्रियाणामुपघातेकथंस्मृतिः
मनोपिनतथाज्ञानाद्यनध्यक्षंतदाभवेत् ४९ धर्माधर्माश्रयोध्यक्षोविशेषगुणयोगतः प्रवृत्त्याद्यनुमेयोयंरथगत्येवसारथिः ५० अहं
कारस्याश्रयोयंमनोमात्रस्यगोचरः विभुर्बुध्यादिगुणवान् बुद्धिस्तुद्विविधामता ५१ अनुभूतिःस्मृतिश्चस्यादनुभूतिश्चतुर्विधा
प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे ५२ घ्राणजादिप्रभेदेनप्रत्यक्षंषड्विधंमतं घ्राणस्यगोचरोगंधोगंधत्वादिरपिस्मृतः ५३ त
थारसोरसज्ञायास्तथाशब्दोपिचश्रुतेः ५४ उद्भूतरूपंनयनस्यगोचरोद्रव्याणितद्वंतिपृथक्त्वसंख्ये विभागसंयोगपरापरत्वस्नेहद्र
वत्वंपरिमाणयुक्तं ५५ क्रियाजातिर्योग्यवृत्तिःसमवायश्चतादृशः गृह्णातिचक्षुःसंबंधादालोकोद्भूतरूपयोः ५६ उद्भूतस्पर्शवत्

द्रव्यंगोचरःसोपिचत्वचः रूपान्यच्चक्षुषोयोग्यंरूपमत्रापिकारणं ५७ द्रव्याध्यक्षेत्वचोयोगोमनसाज्ञानकारणं मनोग्राह्यंसुखंदुःखमिच्छाद्वेषोमतिः
का. कृतिः ५८ ज्ञानंयन्निर्विकल्पाख्यंतदतींद्रियमिष्यते महत्त्वंषड्विधेहेतुरिंद्रियंकरणंमतं ५९ विषयेंद्रियसंबंधोव्यापारःसोपिषड्विधः द्रव्यग्रहस्तुसंयो
गात्संयुक्तसमवायतः ६० द्रव्येषुसमवेतानांतथातत्समवायतः तत्रापिसमवेतानांशब्दस्यसमवायतः ६१ तद्वृत्तानांसमवेतानांसमवायेनतुग्रहः प्र
३ त्यक्षंसमवायस्यविशेषणतयाभवेत् ६२ विशेषणतयातद्वदभावानांग्रहोभवेत् यदिस्यादुपलभ्येतसेवंयत्रप्रसज्यते ६३ अलौकिकस्तुव्यापारस्त्रिविधः
परिकीर्त्तितः सामान्यलक्षणोज्ञानलक्षणोयोगजस्तथा ६४ आसत्तिराश्रयाणांतुसामान्यज्ञानमिष्यते तदिंद्रियजतद्धर्मबोधसामग्र्यपेक्षते ६५ वि
षयीयस्यतस्यैवव्यापारोज्ञानलक्षणः योगिनोद्विविधाःप्रोक्तायुक्तयुंजानभेदतः ६६ युक्तस्यसर्वदाभानंचिंतासहकृतापरः व्यापारस्तुपरामर्शः
करणंव्याप्तिधीर्भवेत् ६७॥ ॥ अनुमायांज्ञायमानंलिंगंतुकरणंनहि अनागतादिलिंगेननस्यादनुमितिस्तदा ६८ व्याप्यस्यपक्षवृत्तित्वधीः
परामर्शउच्यते व्याप्तिःसाध्यवदन्यस्मिन्नसंबंधउदाहृतः ६९ अथवाहेतुमन्निष्ठविरहाप्रतियोगिना साध्येनहेतोरैकाधिकरण्यंव्याप्तिरुच्यते ७० सिसाध
यिषयाशून्यासिद्धिर्यत्रनतिष्ठति सपक्षस्तत्रदृष्टत्वज्ञानादनुमितिर्भवेत् ७१ अनैकांतोविरुद्धश्चाप्यसिद्धःप्रतिपक्षितः कालात्ययापदिष्ट
श्चहेत्वाभासश्चपंचधा ७२ आद्यःसाधारणस्तुस्यादसाधारणकोऽपरः तथैवानुपसंहारीत्रिधानैकांतिकोभवेत् ७३ यःसपक्षेविपक्षेचभवे ३
त्साधारणस्तुसः यस्तूभयस्माद्व्यावृत्तःसत्वसाधारणोमतः ७४ तथैवानुपसंहारीकेवलान्वयीपक्षकः यःसाध्यवतिनैवास्तिसविरुद्धउदाहृ
तः ७५ आश्रयासिद्धिराद्यःस्यात्स्वरूपासिद्धिरप्यथ व्याप्यत्वासिद्धिरपरास्यादसिद्धिरतस्त्रिधा ७६ पक्षासिद्धिर्यत्रपक्षोभवेन्मणिमयोगिरिः
ह्रदोद्रव्यंधूमवत्वादत्रासिद्धिरथापरा ७७ व्याप्यत्वासिद्धिरपरानीलधूमादिकेभवेत् विरुद्धयोःपरामर्शेहेत्वोःसत्प्रतिपक्षता ७८ ॥

साध्यशून्योयत्रपक्षस्त्वसौबाधउदाहृतः उत्पत्तिकालीनघटेगंधादिर्यत्रसाध्यते ७९ ग्रामीणस्यप्रथमतःपश्यतोगवयादिकं सादृश्यधीर्गवादीनां
यास्यात्साकारणंमतं ८० वाक्यार्थस्यातिदेशस्यस्मृतिर्व्यापारउच्यते गवयादिपदानांतुशक्तिधीरुपमाफलं ८१ पदज्ञानंतुकरणंद्वारंतत्रपदार्थ
धीः शाब्दबोधःफलंतत्रशक्तिधीःसहकारिणी ८२ लक्षणाशक्यसंबंधस्तात्पर्यानुपपत्तितः आसत्तिर्योग्यताकांक्षातात्पर्यज्ञानमिष्यते ८३
कारणंसन्निधानंतुपदस्यासत्तिरुच्यते पदार्थेतत्रतद्वत्तायोग्यतापरिकीर्त्तिता ८४ यत्पदेनविनायस्याननुभावकताभवेत् आकांक्षावक्तु
रिच्छातुतात्पर्यंपरिकीर्त्तितं ८५ साक्षात्कारेसुखादीनांकरणंमनउच्यते अयौगपद्यात्ज्ञानानांतस्याणुत्वमिहेष्यते ८६ अथद्रव्याश्रिताज्ञे
यानिर्गुणानिष्क्रियागुणाः रूपंरसःस्पर्शगंधौपरत्वमपरत्वकं ८७ द्रवत्वंस्नेहवेगाश्चमतामूर्त्तगुणाअमी धर्माधर्मौभावनाचशब्दोबु
ध्यादयोपिच ८८ एतेऽमूर्त्तगुणाःसर्वेविद्वद्भिःपरिकीर्त्तिताः संख्यादिश्चविभागांतउभयेषांगुणामतः ८९ संयोगश्चविभागश्चसंख्या
द्वित्वादिकास्तथा द्विपृथक्त्वादयस्तद्वदेतेनेकाश्रितागुणाः ९० अतःशेषगुणाःसर्वेमताएकैकवृत्तयः बुध्यादिषट्कंस्पर्शांताःस्नेहःसांसि
द्धिकोद्रवः ९१ अदृष्टभावनाशब्दाअमीवैशेषिकागुणाः संख्यादिरपरत्वांतोद्रवोऽसांसिद्धिकस्तथा ९२ गुरुत्ववेगौसामान्यगुणा
एतेप्रकीर्त्तिताः ९३ संख्यादिरपरत्वांतोद्रवत्वंस्नेहएवच एतेतुद्वींद्रियग्राह्याअथस्पर्शांतशब्दकाः ९४ बाह्यैकैकेंद्रियग्राह्यागुरुत्वादृष्टभा
वनाः ९५ अतींद्रियाविभूनांतुयेस्युर्वैशेषिकागुणाः अकारणगुणोत्पन्नाएतेतुपरिकीर्त्तिताः ९६ अपाकजास्तुस्पर्शांताद्रवत्वंचतथावि
धं स्नेहवेगौगुरुत्वैकपृथक्त्वपरिमाणकं ९७ स्थितिस्थापकइत्येतेस्युःकारणगुणोद्भवाः संयोगश्चविभागश्चवेगश्चैतेतुकर्मजाः ९८

स्पर्शांतपरिमाणैकपृथक्त्वस्नेहशब्दके भवेदसमवायित्वमथवैशेषिके गुणे ९९ आत्मनः स्यान्निमित्तत्वमुष्णस्पर्शगुरुत्वयोः वेगेपिचद्रवत्वेच
का संयोगादिद्वयेतथा १०० द्विधैवकारणत्वंस्यादथप्रादेशिको भवेत् वैशेषिको विभुगुणः संयोगादिद्वयंतथा १०१ चक्षुर्ग्राह्यंभवेद्रूपं द्रव्या
४ देरुपलंभकं चक्षुषः सहकारिस्यात् शुक्लादिकमनेकधा २ जलादिपरमाणौ तन्नित्यमन्यत्सहेतुकं रसस्तुरसनाग्राह्योमधुरादिरनेकधा ३
सहकारिरसज्ञाया नित्यतापिचपूर्ववत् घ्राणग्राह्यो भवेद्गंधो घ्राणस्यैवोपकारकः ४ सौरभश्चासौरभश्चसद्वेधापरिकीर्तितः स्पर्श
स्त्वगिंद्रियग्राह्योत्वचःस्यादुपकारकः ५ अनुष्णाशीतशीतोष्णभेदात्सत्रिविधोमतः काठिण्यादिक्षितावेव नित्यतादिचपूर्ववत् ६ ए
तेषांपाकजत्वंहि क्षितौनान्यत्रकुत्रचित् तत्रापिपरमाणौस्यात्पाको वैशेषिकेमते ७ नैय्यायिकानांतुनये द्व्यणुकादावपीष्यते गणना
व्यवहारेतुहेतुः संख्याभिधीयते ८ नित्येषुनित्यमेकत्वमनित्येनित्यमिष्यते द्वित्वादयः परार्धांता अपेक्षाबुद्धिजामताः ९ अनेकाश्रयप
र्याप्ताएतेतुपरिकीर्तिताः अपेक्षाबुद्धिनाशाच्चतेषांनाशोनिरूपितः १० अनेकैकत्वबुद्धिर्यासापेक्षाबुद्धिरिष्यते परिमाणंभवेन्मानव्य
वहारस्यकारणं ११ अणुदीर्घंमहद्ध्रस्वमितितद्भेदईरितः अनित्यंतदनित्यस्यान्नित्येनित्यमिहेष्यते १२ संख्यातःपरिमाणाच्चप्रचयाद ४
पिजायते अनित्यंद्व्यणुकादौतुसंख्याजन्यमुदाहृतं १३ परिमाणंघटादौतुपरिमाणजमुच्यते प्रचयःशिथिलाख्योयःसंयोगस्ते
नजन्यते १४ परिमाणंतूलकादौनाशस्त्वाश्रयनाशतः संख्यावत्तुपृथक्त्वंस्यात्पृथक्प्रत्ययकारणं १५ अन्योन्याभावतोनास्यचरितार्थत्वमिष्य
ते अस्मात्पृथगिदंनेतिप्रतीतिर्हिविलक्षणा १६ अप्राप्तयोस्तुयाप्राप्तिःसैवसंयोगईरितः कीर्तितस्त्रिविधस्त्वेष आद्योन्यतरकर्मजः १७

तथोभयस्पंदजन्यो भवेत्संयोगजोपरः आदिमःश्येनशैलादिसंयोगःपरिकीर्तितः १८ मेषयोःसंनिपातोयःसद्वितीयउदाहृतः कपालतरुसंयो
गात्संयोगस्तरुकुंभयोः १९ तृतीयःस्यात्कर्मजोपिद्विधैवपरिकीर्तितः अभिघातोनोदनंचशब्दहेतुरिहादिमः २० शब्दाहेतुर्द्वितीयःस्या
द्विभागोपित्रिधाभवेत् एककर्मोद्भवस्त्वाद्यो द्वयोःकर्मोद्भवोपरः २१ विभागजस्तृतीयःस्यात्तृतीयोपिद्विधाभवेत् हेतुमात्रविभागोत्थो हे
त्वहेतुविभागजः २२ परत्वंचापरत्वंचद्विविधंपरिकीर्तितं दैशिकंकालिकंचापिमूर्तएवतुदैशिकं २३ परत्वंसूर्यसंयोगभूयस्त्वज्ञानतो
भवेत् अपरत्वंतदल्पत्वज्ञानतःस्यादितीरितं २४ तयोरसमवायीतुदिक्संयोगस्तदाश्रये दिवाकरपरिस्पंदभूयस्त्वज्ञानतोभवेत् २५
परत्वमपरत्वंचतदीयाल्पत्वबुद्धितः अत्रासमवायीस्यात्संयोगःकालपिंडयोः २६ अपेक्षाबुद्धिनाशेननाशस्तेषामुदाहृतः बुद्धेःप्रपंचः
प्रागेवप्रायशोपिनिरूपितः २७ अथावशिष्टोप्यपरःप्रकारःपरिदृश्यते अप्रमाचप्रमाचेतिज्ञानंद्विविधमिष्यते २८ तच्छून्येतन्मतिर्यास्याद
प्रमासानिरूपिता तत्प्रपंचोविपर्यासःसंशयादिप्रकीर्तितः २९ आद्योदेहेष्वात्मबुद्धिःशंखादौपीततामतिः भवेन्निश्चयरूपायासंशयो
थप्रदृश्यते ३० किंस्विन्नरोथवास्थाणुर्वेत्यादिबुद्धिस्तुसंशयः। तदभावाप्रकाराधीस्तत्प्रकारातुनिश्चयः ३१ संशयोमतिर्यास्यादेक
त्राभावभावयोः। साधारणादिधर्मस्यज्ञानंसंशयकारणं। ३२॥ दोषोप्रमायाजनकः प्रमायास्तुगुणोभवेत्। पित्तदूरत्वादिरूपोदोषोना
नाविधोमतः ३३ प्रत्यक्षेतुविशेष्येण विशेषणवतासमं। सन्निकर्षोगुणस्तुस्यादथत्वनुमितौपुनः ३३ पक्षेसाध्यविशिष्टेतुपराम
र्शोगुणोभवेत्। शक्येसादृश्यबुद्धिस्तुभवेदुपमितौगुणः ३४ शाब्दबोधेयोग्यतायास्तात्पर्यस्याथवाप्रमा। गुणःस्यात् भ्रमभिं

च
न्नंतु ज्ञानमं त्रेोपते प्रमा। अथवा तत्प्रकारं यत्तु ज्ञानं तद्विशेषकं। तत्प्रमा नाप्रमा नापि भ्रमस्यान्निर्विकल्पकं १३६ प्रकारतादिशून्यं हि सं
का. बंधानवगाहितत्। प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः ३७ व्यभिचारस्याग्रहोपि सहचारग्रहस्तथा। हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छंका
निवर्तकः ३८ साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा। स उपाधिर्भवेत्तस्य निष्कर्षोयं प्रदर्श्यते ३९ सर्वे स्युः साध्यसमानाधिकर
५ णाः स्युरुपाधयः। हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता। ४०। व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनं। शब्दोपमानयोर्नैव पृथक्
प्रामाण्यमिष्यते ४१ अनुमानगतार्थत्वादिति वैशेषिकं मतं तन्न सम्यक् विना व्याप्तिबोधं शाब्दादिबोधतः ४२ द्विविधं तु भवेद्व्याप्तिरन्वयव्य
तिरेकतः अन्वयव्याप्तिरुक्तैव व्यतिरेकाधुनोच्यते ४३ साध्याभावव्यापकत्वं हेत्वाभासस्य यद्भवेत् अर्थापत्तिस्तु नैवेह प्रमाणांतरमि
ष्यते ४४ व्यतिरेकव्याप्तिबुध्या चरितार्था हि सा यतः सुखं तु जगतामेव काम्यं धर्मेण जन्यते ४५ अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेत ५
सां निर्दुःखत्वे सुखे चेच्छा तत्ज्ञानादेव जायते ४६ इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा
तु या भवेत् ४७ तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् बलवद्विष्टहेतुत्वमतिः स्यात्प्रतिबंधिका ४८ तद्धेतुत्वबुद्धेर्हेतुत्वं क
स्यचिन्मते द्विष्टसाधनताज्ञानं भवेद्द्वेषस्य कारणं ४९ प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणं एवं प्रयत्नत्रैविध्यं तांत्रिकैः परिकीर्तितं ५०
चिकीर्षा कृतिसाध्येष्टसाधनत्वम[ति]स्तथा उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ५१ निवृत्तिस्तु भवेद्द्वेषाद्द्विष्टसाधनताधियः
यत्नो जीवनयोनिस्तु सर्वदातींद्रियो भवेत् ५२ शरीरे प्राणसंचारे कारणं तत्प्रकीर्तितं अतींद्रियं गुरुत्वं स्यात्पृथिव्यादिद्वये तु तत् ५३

अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतं। तदेवासमवायी स्यात्पतनाख्ये तु कर्मणि १५४ सांसिद्धिकं द्रवत्वं स्यान्नैमित्तिकमथापरं। सांसि
मु. कारि. द्धिकं द्रवत्वं स्यान्नैमित्तिकमथापरं। सांसिद्धिकं तु सलिले द्वितीयं क्षितितेजसोः ५५ परमाणौ जले नित्यमन्यत्रानित्यमुच्यते। नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु ५६
५ द्रवत्वं स्यंदने हेतुर्निमित्तं संग्रहे तु तत्। स्नेहो जले स नित्योणावनित्योवयविन्यसौ ५७ तैलांतरे तत्प्रकर्षाद्दहनस्यानुकूलता।
संस्कारभेदो वेगोथ स्थितिस्थापकभावने। ५८ मूर्तमात्रे तु वेगः स्यात्कर्मजो वेगजः क्वचित्। स्थितिस्थापक संस्कारः क्षितौ केचिच्च
तुर्ष्वपि। ५९ अतींद्रियोसौ विज्ञेयः क्वचित्स्पंदेपि कारणं। भावनाख्यस्तु संस्कारो जीववृत्तिरतींद्रियः। ६०॥ उपेक्षानात्मकस्तस्य नि
श्चयः कारणं भवेत्। स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते ६१ धर्माधर्मावदृष्टं स्याद्धर्मः स्वर्गादिसाधनं। गंगास्नानादियागादि
व्यापारः स तु कीर्तितः ६२ कर्मनाशाजलस्पर्शादिनानाश्यस्त्वयं मतः। अधर्मो नरकादीनां हेतुर्निंदितकर्मजः ६३ प्रायश्चित्तादि
नाश्योसौ जीववृत्तिस्त्विमौ गुणौ। एतौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः ६४ शब्दो ध्वनिश्च वर्णश्च मृदंगादिभवो ध्वनिः।
कंठसंयोगादिजन्या वर्णास्ते कादयो मताः ६५ सर्वशब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते। वीचीतरंगन्यायेन तदुत्पत्तिस्तु की ६
र्तिता। ६६ कदंबमुकुलन्यायादुत्पत्तिः कस्यचिन्मते। उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता॥ ६७ सोयं क इति बुद्धिस्तु साजात्य
मवलंबते। तदेवौषधमित्यादौ सजातीयेपि दर्शनात्। ६८ इति श्रीमहोपाध्यायविश्वनाथभट्टाचार्यविरचिता परिभाषावली
समाप्ता॥

[redacted] ॐ शोभननमोधवलेशंकरे:

Sarvānukramadīpikā.	Title
Kātyāyana.	Author
Gaṇeśa Dokhala. commentator.	~~Editor~~
	Year, Vols.
	Publisher
	Remarks

392 a.

ननुविश्वामित्रग्रहणंअनर्थकंमधुछंदसैवार्षज्ञानसिद्धेः।ननुअन्वयज्ञानस्याभ्युदयस्यहेतुत्वात्॥ऋषीणामार्षगोत्राणांज्ञानमायुष्यमुच्यते।पुत्रियंचयशस्यंचस्वस्त्यमभित्रंहंभातिशौनकवचनात् २

श्रीगणेशायनमः॥इदानींसूक्तप्रतीकादीनामनुक्रमिष्यामः।ॐअग्निंनवमधुछंदावैश्वामित्रः।अग्निमीळइतिनवर्चंसूक्तं।९।विश्वामित्रपुत्रोमधुछंदाह
षिः।अथहविश्वामित्रःपुत्रानामंत्रयामासमधुछंदाःशृणोतनइतिस्मृतेः।इंद्रंविश्वाअवीवृधन्नितिसूक्तद्वयेकादशसूक्ते पुत्रेतार्षपर्यंतंमधुछंदाह्यृषि
र्द्रष्टव्यः।अग्निर्देवता।मंडलादिष्वाग्नेयमैंद्रादितिपरिभाषोक्तेः।स्कन्दपक्षेतुदशैंद्रमित्यतःप्राक्आग्नेयमित्यर्थः।गायत्रीछंदः।आदौगायत्रंप्राग्घि
रण्यस्तूपादितिपरिभाषावचनात्।त्वमग्नेप्रथमोअंगिराइत्यंततोहिरण्यस्तूपर्षेःप्राक्गायत्रंछंदोवेदितव्यं।सूक्तानांविनियोगः।सर्वेत्रोन्वंते।
अग्निमीळेसूक्तंप्रातरनुवाकानुमंत्रणेसूत्रकारः।वायोवायव्यैंद्रवायवमैत्रावरुणास्तृचाः।वायवायाहीतिनवर्चंसूक्तं।९।पूर्ववदसूक्तसंख्यानुव
चैवइतिपरिभाषावचनात्।पूर्ववन्मधुछंदाऋषिः।चकाराद्अन्यस्माद्द्वेषीरितिवचनात्।वायवायाहिप्रथमस्तृचोवायुदेवत्यः।इंद्रवायूइमइति
द्वितीयस्तृचऐंद्रवायवः।इंद्रग्रहणंद्विदेवत्यज्ञापनार्थं।मित्रंहुवइतितृतीयस्तृचोवायुदेवत्यः।मैत्रावरुणः।अनादेशाद्गायत्रीछंदः। ।अश्विनाद्या
तृचाश्विनैंद्रवैश्वदेवसारस्वतास्तृचाःसप्तैताःप्रउगदेवताः॥ ॥अश्विनायज्वरीरिषइतिद्वादशर्चंसूक्तं।१२।मधुछंदाऋषिः।अश्विनायज्वरीरिष
इतिचतुर्थस्तृचोविश्वदेवत्यः।इंद्रायाहिपंचमस्तृचइंद्रदेवत्यः।ओमासइतिषष्ठस्तृचोवैश्वदेवदेवत्यः।पावकानःसरस्वतीतिसप्तमस्तृचःसरस्व
तीदेवत्यः।एतेद्वेसूक्तेवायवायाह्यश्विनायज्वरीरिषसप्ततृचाःप्रउगशस्याःप्रउगदेवतावायव्याद्याःसरस्वत्यंताःक्रमेणज्ञातव्याःश्रूयते॥आग्ने
यीषुसामगास्तवलेवायव्ययाहोताप्रातरपद्यतेकथमस्याग्नेय्योनुशस्ताभवंतीत्याग्नेय्यःएताःसर्वास्त्वन्योयदेतादेवताःसप्तदृष्टिःप्रचानिवहहवी

४ अश्वि॰मधुछंद॥आद्योश्विदेवत्यस्तृचः।इंद्रा।मित्रधातुद्रस्तैंद्रोद्वितीयः।इंद्रग्रहणंअस्याधिकारनिवृत्त्यै।ओमास·इतिवैश्वदेव्यः।पावकानइतिसारस्वतः।ननुवैश्वदेवत्वंकस्मात्।सूक्तद्वयस्यन्त्सावति·कथं·विप्रकृततित्वात्।त्रिविधा
निवैश्वदेवानिवपृक्तकलिाविश्वलिंगस्तूर्यसंस्तवइति।उच्यते।सप्तैताःदेवताःसप्तैताःप्राद्याःप्रउगंसस्तवसंबंधिन्योदेवताद्वितीयतृतीयसूक्तेद्विदर्शनात्सप्तग्रहणंनकर्तव्यंमंतरेणापिप्रतीयमानत्वात्।नसखल्वनंतर्यात्प्रदनीयस्त्वनी
यस्तुकोपादस्थानामेवप्रउगदेवतानांशंकास्यात्।प्रउगग्रहणमेतास्वेवभातिपातः।सर्वत्रप्रउगग्रहणेयथास्यादिति।वक्ष्यति।उक्तादेवताःप्रउगेणेति।तथास्मृतिः।वायवाया।हदर्शताश्विनायज्वरीरिषइत्येतेउभे·सप्तत्र्यंगंनवर्चंद्वादश
चैचेति।अनादेशात्गायत्रं ४

१ऋतवरा।ऋतस्पृक्ताकृतयइति।१॥सूक्तंमाधुच्छंदसमानादेशादन्यत्रमैंद्रं॥३॥७ अग्निमन्थामजमरुतः आदहस्वधामितिषण्मारुत्यन्त्वोमवांत ७

तिब्राह्मणस्त्रेनेः सर्वाप्रउगदेवताअग्निरूपाउक्ताः।तेनमंडलादिष्वाग्नेयमैंद्रादिकल्पपन्नंभवति।प्रउगंनाममहोक्थं प्रातःसवनेद्वितीयंशास्त्रं।वायवायाहिदर्श
२२ तेतिप्रउगमभिनिब्राह्मणस्क्तिः माधुच्छंदसंप्रउगमित्येतदानन्दतद्वतिसूत्रकारः अन्यानिप्रउगाणिक्रमेणवर्त्तंते।गायत्रंप्रउगंकुर्यादित्याङ्करित्या
दिससप्रउगाणिसमछंदस्कानिजगत्यंतानिमहाव्रतारण्यकेउक्तानि॥ = ॥सुरूपकृत्नुदशैंद्रं॥ ॥सुरूपकृत्नुमितिदशर्चंसूक्तं।१०॥मधुच्छंदाह
सषिः इंद्रोदेवता।मंडलादिष्वैयमवधिः गायत्रीछंदः सूक्तंसुरूपकृत्नुमितिषट्सूक्तकान्यावापइतिसूत्रकारः॥ ॥आतु॥ ॥आत्वेतानीतिदश
र्चंसूक्तं१०॥ पूर्ववत्सूक्तसंख्येति।माधुच्छंदाऋषिः अनादेशात्इंद्रोदेवता।गायत्रीछंदः आत्वेतानिषीदतेतिसूक्तंरात्रिपर्यायशस्त्रेसूत्रका
रः॥ ॥युंजंत्यादहेत्येताःषण्मारुत्योवीळुचिदिंद्रेणेत्यैंद्रीच।युंजंतिब्रध्नमितिदशर्चंसूक्तं१०॥पूर्ववत्सूक्तसंख्येतिमधुच्छंदाऋषिः अनादेशा
त्इंद्रोदेवता।गायत्रीछंदः ॐआदहस्वधामित्याद्याःपञ्चर्चोमरुद्देवत्याः॥ततः वीळुचिदित्यृक्।इंद्रेणसंहीत्यृक्।एतद्द्वेऋचौचकारात्ऐंद्रमरु
द्देवत्यौ।युंजंतिब्रध्नमरुषमितिसूक्तंरात्रिपर्यायशस्त्रेसूत्रकारः॥ ॥इंद्रमित्॥ ॥इंद्रमिद्गाथिनइतिदशर्चंसूक्तं१० पूर्ववत्सूक्तसंख्येति।मधुच्छंदा
ऋषिः अनादेशात्इंद्रोदेवता।गायत्रीछंदः इंद्रमिद्गाथिनइतिसूक्तंरात्रिपर्यायशस्त्रेसूत्रकारः ऐंद्रसानसिंरयिं॥ ऐंद्रसानसिमितिदशर्चंसूक्तं१०
पूर्ववत्सूक्तसंख्येति।मधुच्छंदाऋषिः अनादेशात्इंद्रोदेवता।गायत्रीछंदः ऐंद्रसानसिमितिसूक्तेबृहतीसहस्रशस्त्रेआरण्यकेमहाव्रते॥ इंद्रेहि॥
इंद्रेहिमत्सीतिदशर्चंसूक्तं१० पूर्ववत्संख्येति।मधुच्छंदाऋषिः अनादेशात्इंद्रोदेवता।गायत्रीछंदः इंद्रेहिमत्सीतिसूक्तंरात्रिपर्यायशस्त्रेसूत्रकारः॥ ॥गायंति २२
त्वाद्वादशानुष्टुभंतुः गायंतित्वेतिद्वादशर्चंसूक्तं१२ मधुच्छंदाऋषिः अनादेशात्इंद्रोदेवता।अनुष्टुप्छंदः तुशब्दात्उत्तरसूक्तमानुष्टुभं।गायंतिपंनित्वास्र

सूक्तमच्छावाकशस्त्रेपञ्चहेसूत्रकारः इंद्रमच्छेजेतामाधुच्छंदसः॥ ॥इंद्रंमेळेविश्वाइत्यष्टर्चंसूक्तं।८।मधुच्छंदसःपुत्रोजेताऋषिरपश्यत्।अनादेशात्
इंद्रोदेवता।तुशब्दात्अनुष्टुप्छंदः इंद्रंविश्वाअवीवृधन्नितिसूक्तमारण्यकेबृहतीसहस्रशस्त्रेमहाव्रते।अग्निंद्वादशमेधातिथिःकाण्वआग्नेय
मग्निनेतिपादोह्याग्निदेवतोनिर्मंथ्याआहवनीयात्संश्च॥अग्निंदूतंद्वादशर्चंसूक्तं१२ कण्वपुत्रोमेधातिथिःऋषिः अपश्यत्।काण्वंमेध्यातिथ
नकाम्युपाकृदृषने व ऋतिः आपउनःशेपात्द्वादशर्चंसूक्तंपुमेधातिथिरपश्यत्।अग्निर्देवता-अस्यत्याग्नेयंगायत्रीछंदः ततः अग्निनाग्निरितिप्रथमपादोह्याग्निदेवतः होवाग्निदेव
तेयस्येतिह्याग्निदेवतः एकोनिर्मंथ्यः चकाराद्वाद्वितीयआहवनीयः एतौद्वौअग्निंदूतंवृणीमहइतिद्वितीयस्याऋक्आज्यंभवतीतिब्राह्मणसूत्रयोः॥ ॥
ऋतसमिद्धइतीध्मःसमिद्धोअग्निस्तनूनपान्नराशंसइळोबर्हिर्देवीर्द्वारउषासानक्तादैव्याहोतारौप्रचेतसौतिस्रोदेव्यःसरस्वतीळाभारतीत्वष्टावनस्प
तिःस्वाहाकृतयइतिप्रत्यंदेवताः॥ऋतसमिद्धोनइतिद्वादशर्चंसूक्तं१२।पूर्ववत्सूक्तसंख्येतिमेधातिथिःऋषिः प्रत्यंदेवताउक्तंने।ऋतसमिद्धोनइति
प्रथमयांइध्मोग्निः विकल्पेनसमिद्धोग्निः ततः मधुमंतइतिद्वितीयायांतनूनपात्।ततः नराशंसमिहेत्यत्तीयायांनराशंसः ततः अग्नेसुखतमइति
चतुर्थ्यांइळः ततःस्तृणीतबर्हिरितिपंचम्यांबर्हिः ततः विश्रयंतामितिषष्ठ्यांदेवीर्द्वारः ततः नक्तोषासेतिसप्तम्यांउषासानक्ता।ततःताजिह्वाविप्र
ष्टम्यांदैव्योहोतारौ।प्रचेतसाप्रकृष्टज्ञानवन्तौनोयाव्यादित्यो।अग्निवरुणौवा।वरुणआदित्योवेतिविकल्पेन।ततः इळासरस्वतीतिनवम्यां
कतिस्रोदेव्यःतिस्रोदेव्यःसरस्वत्येका।इळाद्वितीया।भारतीतृतीयेति।ततः इहत्वष्टारमितिदशम्यांत्वष्टास्तुतिः त्वाष्ट्रीततःअवसृजेत्येका

दर्थं वनस्पतिः ततः स्वाहायज्ञमिति द्वादश्यां स्वाहाकृतियः॥ एताः सर्वा देवता अग्निरूपा गायत्री छंदः॥ ॥एतदाप्रीसूक्तं॥ एतत्सूक्तमाप्रीसंज्ञक

मित्यर्थः॥ ॥एतेनान्यान्युक्तदेवतानि॥ ॥एतेन सूक्तेन॥ अन्यानि सूक्तानि भातपादिनं देवतानि भवंति॥ एतत्क्रमेतद्देवतानीत्यर्थः॥ तत्र दशममंड

२१ लसंहितायां दशाप्रीसूक्तानि भवंति॥ एकादशकानि तु॥ तुशब्दाव शेषिकु आप्रीसूक्तं प्रैषाध्यायसहेवमित्येकादशकानित्यर्थः॥ अनाराशंसान्या

प्रशब्दोक्तानि तत्तनूनपांति॥ अनाराशंसानीत्यत्र तनूनपाद्युक्तानि चत्वारि सूक्तानि॥ अग्निशास्त्रे आप्रशब्दस्याग्निस्तुक्तानि नराशंसदेवता

नि तनूनपाद्वर्जितानि॥ एकादशर्चानि भवंति॥ तत्र समिद्धएकादशाग्निमित्यादौ॥ आप्रशब्दोक्तात् तनूनपातीति सिद्धः॥ अन्यत्र विस्पष्टार्थः॥

तत्र दृष्टांतः आग्नेया वै प्रयाजा इति नैरुक्ते॥ होता यज्ञदाप्रीभिः प्रैषसालिंगाभिरिति सूत्रकारः॥ आप्रीभिराप्रीणातीति च ब्राह्मणं॥ तान्ये

तान्येकादशाप्रीसूक्तानीति यास्के॥ नोक्तान्येकादशसंख्याकानि॥ तेषामाप्रीसूक्तानां चत्वारि सूक्तानि नराशंसवंति॥ उच्यंते॥ जुषस्वनो १२२

वसिष्ठऋषिर्दृष्टा॥ समिद्धोअद्यमनुषो दुरोण इति॥ ... त्यन्निऋषिर्दृष्टा॥ इमां मे अग्ने समिधं जुषस्वेति वाध्र्यश्वऋषिर्दृष्टा॥ समिद्धो अग्निर्निहितस्पृ

... ऋषिर्दृष्टा॥ समिद्धो अद्य राजसीत्यगस्त्यऋषिर्दृष्टा॥ इत्येतानि चत्वारि सूक्तानि नराशंसवंतीत्यर्थः॥ तनूनपाद्वर्जितानि॥ अपि च॥ त्रीण्याप्रीसूक्तानि तनूनपान्नराशंसमुभय

गृत्समदऋषिर्दृष्टा॥ इत्येतानि चत्वारि सूक्तानि नराशंसवंतीत्यर्थः॥ तनूनपाद्वर्जितानि॥ अपि च॥ त्रीण्याप्रीसूक्तानि तनूनपान्नराशंसमुभय

वंति॥ उच्यंते॥ सुसमिद्धो न आ वहेति मेधातिथिऋषिर्दृष्टा॥ समिद्धो अग्न आ वहेति दैर्घतमसऋषिर्दृष्टा॥ होता यक्षदग्निं समिधेति प्रैषाध्याय इति त्रीण्युभय

देवतवंति॥ तनूनपान्नराशंसश्चेति॥ ततः चत्वार्यन्यान्युच्यंते॥ समिद्धो अद्य राजसीत्यगस्त्यऋषिर्दृष्टा॥ समित्समित्सुमना इति विश्वामित्रऋषिर्दृष्टा॥

समिद्धो विश्वतस्पतिरिति कश्यपोसितद्वाष्टर्षीदृष्टा॥ समिद्धो अद्य मनुषइति जमदग्निऋषिर्दृष्टा॥ इत्येतानि चत्वारि सूक्तानि तनूनपाद्देवतानि॥ नराशं

सेनः श्रूयते॥ तेषां वासिष्ठमात्रेयं वाध्र्यश्वं गार्त्समदमिति नाराशंसवंति॥ अपि च॥ मेधातिथिं दैर्घतमसं प्रैषिकमित्युभयवंति॥ ततः अन्यानि त

नूनपात्वंतीति यास्कनिदर्शनानि॥ एकादश प्रयाजा इति ब्राह्मणस्त्रयोर्वचनात्॥ तत्र स्वाहाकृतयो देवता इत्यस्य वैश्वदेवत्वमिति॥ तदाक्तुः

काः देवताः स्वाहाकृतयइति विश्वे देवाः इति श्रुयादिति ब्राह्मणश्रुतिः॥ एभिर्वैश्वदेवं॥ एभिरग्न इति द्वादशर्चं सूक्तं १२ पूर्ववत्सूक्तसंख्येति मेधाति

थिऋषिः विश्वेदेवा देवता॥ गायत्री छंदः॥ एभिरग्ने दुवो गिर इति वैश्वदेवमिति ब्राह्मणश्रुतिः॥ इंद्र सोमं पिब तत्र ऐंद्री मारुती त्वाष्ट्री आग्नेयी ऐंद्री मे

त्रावरुणी तत्र द्राविणोदस आश्विन्याग्नेय्यश्च देवताः सर्वत्र॥ ॥इंद्र सोमं पिबेति द्वादशर्चं सूक्तं १२ पूर्ववत्सूक्तसंख्येति॥ मेधातिथिऋषिः

ऋतुदेवता उच्यंते॥ इंद्र सोममिति प्रथमर्कं ऐंद्री॥ मरुतः पिबतेति द्वितीयर्क मारुती॥ अभि यज्ञं गृणीहीति तृतीयर्कं॥ त्वाष्ट्री॥ अग्ने देवाँ इहेति च

तुर्थ्यृक्॥ आग्नेयी॥ ब्राह्मणादिंद्रेति पंचम्यृकं ऐंद्री॥ युवं दक्षमिति षष्ठ्यृक् मैत्रावरुणी॥ द्रविणोदा इत्याद्याश्चतस्रो द्राविणोदस्यः॥ गु

देवताः॥ अग्निरुपेत्यर्थः॥ अश्विना पिबतं मध्विति एकादश्यृक् अश्विदेवत्या॥ गार्हपत्येनेति द्वादश्यृक् आग्नेयी॥ एता द्वादशर्चाः क्रमेण ऋतुदे

६ इदमाग्नेयमिवमंत्रलिंगात् वैश्वदेवमध्यवसितमाचार्यैः॥ तथा चोक्तं॥ आग्नेयमिथ्यते भवेत् वैश्वदेवं तु उच्यते॥ ... वैश्वदेवेषु सज्जतः इति॥ ६

अग्निमरुत्वाहर्यात्... ---- निंद्रोमध्यस्थानोनरवध्वयेरेवाहसर्वात्मकत्वंनैवविस्थानत्वंनरायेमंडलवोग्निशब्दाभिधेयारेवदेवतः अयणीत्वात्मानःतद्र पयद्वपे...
...मानिशंसमाल्लंतद्रति आहच एवमेतेद्युलोके...

वतावेदितव्याः एतेवेवसंवादयइत्यर्थः। अपिच। तुभ्यंपत्रैतव्यंतुजागतंतुमंदस्वहोत्रादितिसाकमुपतिष्ठते। ऋतुयाजैश्चरंतीतिसूत्रकारः। गाय
त्रीछंदः। आत्वानव। आत्वावहंत्विति नवर्चंसूक्तं ६ मेधातिथिरृषिः। अनादेशात्इंद्रोदेवता। गायत्रीछंदः। आत्वावहंतुहरयइतिप्रातःस
वनउन्नीयमानसूक्तमितिब्राह्मणस्तत्रयोः। इंद्रावरुणयोरैंद्रावरुणंयुवाकुपादानिस्त्रवाविद्रोद्धसीयसीव। इंद्रावरुणयोरितिनवर्चंसूक्तं ७
सूक्तसंख्येति। मेधातिथिरृषिः। इंद्रावरुणौदेवता। यस्ततेदेद्रावरुणं। गायत्रीछंदः। युवाकुहीतिद्वाभ्यांयोपादानेत्र्यवगायत्रोत्रचःसप्तकः ततः
इंद्रःसहस्रदाव्नामित्येकद्वसीयसीगायत्रीद्वेया। इंद्रावरुण। योरहमितिसूक्तंस्वाध्यायधर्मः। सोमानमितिपंचब्राह्मणस्पत्यानचतुर्थ्यामिंद्रश्चसो
मश्चपंचम्यांदक्षिणास्वान्याःसादसस्पत्यानाराशंसीवांसाः। ॥सोमानंस्वरणमितिनवर्चंसूक्तं ८ सूक्तसंख्येति। मेधातिथिरृषिः। सोमान
मित्याद्याःपंचर्चोब्राह्मणस्पतिदेवत्याः सघावीरोनरिष्यतीतिचतुर्थ्यामिंद्रसोमौक्तनोचकाराद्ब्रह्मणस्पतिदेवतात्वेनस्थिता। त्वंतंब्रह्मण
स्पतइतिपंचम्यामपिदक्षिणादेवता। चकारातब्रह्मणस्पतिरिंद्रश्च। इह देवतायांपुनिपातस्माकः। त्वमेवेंद्रादीनायुक्तं। ततःसदसस्पतिरित्या
द्यास्तिस्रः सदसस्पतिदेवत्याः। नराशंसमितिसत्यनवम्यकस्यविकल्पेन। नराशंसदेवत्यः। अथवासदसस्पतिदेवतानि। सदसस्पतिस्तृचःस
दसस्पतिमद्भुतमितिसाविच्याद्वितीयमितिसूत्रकारः। सोमानंस्वरणमितिसूक्तंस्वाध्यायधर्मः। ॥प्रतित्यमाग्निमारुतं॥ ॥प्रतित्यंचारुम
...इहाग्निश्चरतिश्रियभिर्लोकेस्मातिभिरीतकवः जातवेदा...
...इहेप्यवमानोऽग्निर्मध्यमोग्निस्तत्पावकः अमुष्मिन्नेवविद्युत्स्कोऽग्निः शुचिरुच्यते...
...ऋभुर्विस्वाचराजन्यस्यत्स्तामहेजस...
...तेषांसूक्तानिदसूक्तं...

तिनवर्चंसूक्तं ९ पूर्ववत्सूक्तसंख्येति। मेधातिथिरृषिः। अग्निश्चमरुतश्चदेवता अस्येत्याग्निमारुतं। गायत्रीछंदः। प्रतित्यंचारुमितिसूक्तंशारदां
तरआग्निमारुतशस्त्रेतथास्वाध्यायधर्मः॥ ॥इतिश्रीमदृग्वेदानुक्रमणिदीपिकायांडाखलोपनामकसदाशिवसूनुगणेशकृतोप्रथमाष्टकस्य
प्रथमोध्यायः॥ ॥अयमहाशार्भवं॥ अयंदेवायेत्यष्टर्चंसूक्तं १० ॥ मेधातिथिरृषिः। ऋभवोदेवता। अस्येत्यार्भवं। गायत्रीछंदः। अयंदे
वायजन्मनइत्यार्भवमितिब्राह्मणस्कातः। इहएकैंद्राग्नं। इहेंद्राग्नीइतिषडर्चंसूक्तं ११ ॥ मेधातिथिरृषिः। इंद्राग्नीदेवता। अस्येत्यैंद्राग्नं। गा
यत्रीछंदः। इहेंद्राग्नीसूक्तमच्छावाकशस्त्रेसूत्रकारः। प्रातर्युजासेकाचतस्रआश्विन्यस्तथासाविच्यआग्नेयोद्वेदेवीनामेकैकेंद्राणीवरुणा
न्यग्नायीनांद्यावापृथिव्येपार्थिवीषट्वैद्वव्योतोदेवादेवीवा॥ ॥प्रातर्युजेत्येकविंशत्यर्चंसूक्तं १२ ॥ अनिरुक्तासंख्याविंशतिरितिपरिभा
षावचनात। मेधातिथिरृषिः। प्रातर्युजेत्याद्याश्चतस्रोश्विदेवत्याः ततःहिरण्यपाणिमूतयइतिचतस्रश्चेत्सथासावित्र्यः। ततःअग्नेपत्नी
रिहावहेतिद्वेतत्त्वावाग्नेय्यो। अभिनोदेवीरितिदेवीनांसूक्तातिरेका। इहेंद्राणीमित्यकत्तिस्रोदेवताः इंद्राणीत्येका। वरुणानीद्वितीया॥
अग्नायीमितितृतीयेति। ततः महीद्यौरितिद्वेत्वौद्यावापृथिव्यो। ततःस्योनापृथिवीत्येकापार्थिवी। ततःअतोदेवाइत्याःषडर्चोवि
ष्णुदेवत्यः अतोदेवाइत्येकाविकल्पेनदेवादेवता। अस्याइतिदेवी। इत्येताःसूक्तदेवताःक्रमेणज्ञातव्याः इदंबहुदेवत्यंसूक्तं। गायत्रीछंदः।
आश्विनस्यप्रातर्युजाविबोधयेतिसूत्रकारः। तथाअतोदेवाअवंतुनइतिजपेदितिविनियोगः। तीव्राश्चतुर्विंशतिवायव्यैकेंद्रवाय

१ मरुत्वानिंद्रोदेवताअस्मिन्मरुत्वतीय॥

ध्योमैत्रावरुणमरुत्वतीयवैश्वदेवपौष्णास्तृचाः।शिष्टाआग्नेय्याघ्यर्धाग्नेय्यश्चंतःपुरउष्णिक्परानुष्टुप्पंक्तिरत्र्यंतास्याएकविंशीप्रतिष्ठा॥
तीव्राःसोमासइतिचतुर्विंशत्यृचंसूक्तं।२४मेधातिथिऋषिः।सूक्तेदेवताउच्यंते॥तीव्राःसोमासइतिप्रथमाऋक्वायुदेवत्या।परेइंद्रवायव्यौ।मित्रंवयमितितृचोमैत्रावरुणदेवत्यः।मरुत्वंतंहवामहइतितृचोमरुद्देवत्यः।विश्वान्देवान्हवामहइतितृचोवैश्वदेवदेवत्यः।ततः
आपूषन्चित्रबर्हिषमितितृचापूषदेवत्यः।ततःअंबयंतीत्याद्याःशिष्टाऋचअपूदेवत्याः।अंबयोयंत्यध्वभिरित्येताम्नुचुचन्नितिब्राह्मणश्रुतिः। आद्यार्धांत्याप्यंस्तोत्र अध्यर्धान्याग्नेयी४
२ वैश्वदेवीशंकुः
ततःपवस्वानयआगहीत्यंत्यास्तिस्रोधर्चोऽग्निदेवत्यः।अश्वंतइत्यकपुरउष्णिकआद्यश्चेद।अप्सुमेसोमइत्यकपरानुष्टुप्।ततःइदमापःप्रव
हतेत्यंत्यास्तिस्रश्चेत्रिष्टुभः।आपःपृणीतेत्येकाविंशकृत्प्रतिष्ठागायत्री।शेषाःसर्वाऋचागायत्र्यः।तीव्राःसोमासआगहीत्येकोभादेवादि
विश्वशोतिहस्त्रकारः।तथास्वाध्यायधर्मः।कस्यपंचोनाजीगर्तिःशुनःशेपःसहनिमोवैश्वामित्रोदेवरातोवारुणंतुत्रेष्टुसमादौकाच्याग्ने
य्योसावित्रस्तृचोगायत्र्योस्यांत्याभागीवा॥ ॥कस्यनूनमितिपंचदशर्चंसूक्तं१५आनिरुक्तासंख्येति।अजीगर्तस्यऔरसपुत्रःशुनः
शेपऋषिःसएवविश्वामित्रस्य [illegible] त्रिमपुत्रोदेवरातऋषिः।आहिरण्यस्तूपात्।ससस्तूकानिशुनःशेपऋषिरपश्यत्।तथाब्राह्म
पंक्तिः।अथहविश्वामित्रस्यकमासमादेत्यादिदेवरातोदैवहत्तः।देववाइमंमह्यमरासतेतिचतुर्विंशत्यृचंसूक्तं२४मेधातिथिऋषिः। २९

२ आदौसूक्तस्यद्वेऋचौकाच्याग्नेय्यौकःप्रजापतिर्देवताअस्यादृतिकाथी।२
तिवचनात्।तत्रैवआख्यानेश्रूयते।शुनःशेपोयूपेबद्धःअथैदेवताप्राजापत्याद्यास्कद्धाव।सप्तकेनानुवाकेनयत्रश्रावेति।उरुण्यान्मुक्तःकिलेत
दृश्यतदेनदिहेस्यते।वरुणोदेवता।तुशब्दात्उत्तरसूक्तंवारुणं।त्रिष्टुप्छंदः।कस्यनूनंकतमस्यामृतानामितिप्रथमऋक्कोःनामप्रजाप त्रिष्टुप्ग्रहणंबाधकथ नार्थे।
तिर्देवता।सप्रजापतिमेवप्रथमंदेवतानामुपससारकस्यनूनंकतमस्यामृतानामित्येतयर्चेतिब्राह्मणं।ततःअग्नेर्वयंप्रथमस्येतिद्वितीयऋक्आ
ग्नेयी।सोऽग्निमुपससाराग्नेर्वयंप्रथमस्यामृतानामित्येतयर्चेतिब्राह्मणं।ततःअभित्वादेवसवितरितितृचःसवितृदेवत्यःसगायत्रछंदस्कः
।गायत्रवचनेनत्रिष्टुबपवादः।ससवितारमुपससाराभित्वादेवसवितरित्येतेनतृचेनेतिब्राह्मणं।अस्यत्वंस्यांत्यऋक्सगभक्तस्य
वितगदेवत्याविकल्पेन।ततःनहितेक्षत्रमित्याद्यउत्तरसूक्तंयाश्चिद्धितेसहेकाद्शर्चोवरुणदेवतातुष्टाव॥श्रूयते।वरुणंराजानमु
पससारानउत्तराभिरेकत्रिंशतेतिब्राह्मणं। ।याश्चतेका। ।यच्चिद्धितेविशइत्येकविंशत्यृचंसूक्तं।२१॥अनिरुक्तासंख्येति।शुनः
शेपऋषिः।तुशब्दात्वरुणोदेवता।गायत्रीछंदः।यच्चिद्धितेविशइतिवारुणमितिसूत्रकारः ।वसिष्ठदशाग्नेयं। ।वसिष्ठाहीति
दशर्चंसूक्तं१०।शुनःशेपऋषिः।अग्निर्देवता।तुशब्दात्उत्तरसूक्तमाग्नेयं।गायत्रीछंदः।तथाचब्राह्मणेत्युक्तं।सोऽग्निंतुष्टावातउत्तराभि
र्द्वाविंशत्येति।जराबोधतद्वितीयमृक्मध्यमस्थानस्याग्नेरुक्तवृद्धाचार्यवचनात्।रुद्रशब्दश्चाग्निपर्यायएव॥ ॥अश्वंसस्योनागामत्रे
त्यादेवीत्रिष्टुप्। ।अश्वंनत्वेतित्रयोदशर्चंसूक्तं१३आनिरुक्तासंख्येति।शुनःशेपऋषिः।तुशब्दात्अग्निर्देवता।गायत्रीछंदःसो
~ गायत्रेस्मिन्सूक्तेस्यादेवीत्रिष्टुप्देवीवैश्वदेवात्यर्थः ~

१ इहदेवतायांसूक्तमध्यस्ततसोमपतेनीद्रोलूखलयोः स्तुतीमन्वते। यवकान्कत्यादिंद्रस्येवतुप्तास्तुष्टिभिनाः१

ंतुष्टवानउत्तरामिद्दाविंशत्येतिवचनात्वसिष्ठाहीत्यरवंनत्वेतिदेसूक्तेब्राह्मणश्रुतिः। नमोमहद्भ्यइत्यस्यर्कंदेवदेवता। त्रिष्टुप्छंदस्त्व। गा
गायत्र्यग्रहणंजगत्यारांकव्यावृत्त्यर्थं। त्रिष्टुबंतस्यसूक्तस्यत्रिष्टाजगत्यइत्यनुवर्तते। सविश्वान्देवांस्तुष्टावनमोमहद्भ्योनमोअर्भकेभ्यइत्येत
यैतिब्राह्मणश्रुतिः। ततःवसिष्ठाहीत्यरवंनत्वेतिपूर्वोत्तरदेसूक्तेप्रातरनुवाकानुमंत्रणेस्वकारः। यत्रग्रावानवपकनुष्टवादित्यग्निर्द्रौल्

सखल्वेपरमेष्ठोसोल्योनप्रजापतेहरिश्चंद्रस्यांसात्वमेषनरांसावा। यत्रग्रावेतिनवत्वंसूक्तं।५॥ शुनःशेपऋषिः अनादेशावइंद्रोदेवता।
यत्रयानेत्याद्याःषडर्चोनुष्टुभः। आयजीवाजसातमेतितिस्रोगायत्र्योनादेशात्। यच्चिद्धिलंगृहेगृहइतिद्वेस्त्वाउलूखलस्तत्योसेदेवते॥
ततःआजयजीवाजसातमेतिपरेद्वेस्वाउलूखलौनकारावमुसलस्तत्योतेदेवते॥ श्रूयते॥ अथातोहंद्वांन्युलूखलमुसलेउलूखलंव्या
खातंमुसलंमुद्गरमितिनैरुक्ते। सैवदेवतेत्यर्थः। ततःउच्छिष्टंचम्वोर्भरेत्यंत्यर्क्प्रजानांपत्यःहरिश्चंद्रस्यसूक्तिः। विकल्पेनाधिषवणंचर्मेति
द्वयंसोमस्यचर्मणोवासूक्तिः। इयंदेवतेत्यर्थः। हरिश्चंद्रस्यप्रजापतेरितिविशेषणं। श्रूयते। तमेताभिश्चतसृभिरभिसुत्यावयच्चिद्धित्वं
गृहेगृहइत्यथैनंद्रोणकलशमभ्यवनिनायोच्छिष्टंचम्वोर्भरेत्येतयर्चेतिब्राह्मणं॥ यच्चिद्धिसप्तकं॥ यच्चिद्धिसत्येतिसप्तर्चंसूक्तं।७ शु
नःशेपऋषिः अनादेशात्इंद्रोदेवता। पंक्तिछंदः। सइंद्रंतुष्टावयच्चिद्धिसत्यसोमपाइत्येतेनसूक्तेनोत्तरपंचदशाभिरितिब्राह्मणं। उत्त
रस्येतिवचनात्। आवइंद्रमितिसूक्तंसहैवपंचदशर्चेत्यर्थः। ।आवोद्याधिकास्माकंपादनिच्छवर्त्रिष्टुप्परोत्वचाशिनोम
१ तदुक्तंचर्मधिषवणीयंचासोमंचांत्याप्रशंसतीतिचर्मेतिशौनकवचनात्१

यन्नौ-धु

१ दृष्ट्वाचार्यो रवस्त्वपि स्तूयमानः शश्वदितिप्रीतस्तस्मनसादृदौ शुनःशेपायतंहिरण्मयंसविहिरण्मयामतिः२

स्यै। आवइंद्रमितिद्वाविंशत्यर्चंसूक्तं।२२ अनिरुक्तासंख्येति। शुनःशेपऋषिः अनादेशावइंद्रोदेवता। गायत्रीछंदः। ततःअस्माकंशिप्रिणी
नामित्यृक्पादनिच्छवगायत्रीत्र्यःसप्तकाः। ततःशश्वदिंद्रइत्यृक्त्रिष्टुप्। शाकहिरण्यस्तूपादितिगायत्र्यत्वापवादः। ततःआश्विनावश्वा
वत्येतिवचोश्विदेवत्यः। ततःकस्तउषइतित्र्यृचउषादेवत्यः। इतिपरोक्षत्वाविविज्ञेयं। श्रूयते। तस्माइंद्रस्तूयमानःप्रीतोमनसाहिरण्यरथंद
दौतमेतयाप्रतीयायशश्वदिंद्रइतितमिंद्रउवाचेति। ततःआश्विनावश्वावत्येतित्र्यृचः। अश्विनोनुसूक्तमथत्वोषस्यामइतिसोश्विनौतु
ष्टाव। अपिच। कस्तउषइतित्र्यृचःउषसंनुसूक्तमथत्वोषस्यामइतिउषसंतुष्टाव। इत्यादौद्वाश्विनावुषसोदेवतानुष्टावेत्यर्थः। त्वमग्ने
१ द्वाभ्यांमध्यमांउत्तमाधमा प्रनाहिरस्तूपआग्नेयंत्रिष्टुबंत्यष्टमीषोडश्यौच॥ त्वमग्नेप्रथमोअंगिराइत्यृषिरित्यष्टादशर्चंसूक्तं।१८। अनिरुक्तासंख्येति। आंगिरसःपु
त्रोहिरण्यस्तूपऋषिः अनुक्तगोत्रमांगिरसंवि- ध्यादितिवचनात्। हिरण्यस्तूपआंगिरसइतिश्रुतिः। आकण्वात्तत्सूक्तानिहिरण्यस्तू
पऋषिरपश्यत। अग्निर्देवता। त्रिष्टुबंतस्यातजागतंछंदः इतिगायत्र्यधिकारस्यावधिः एतेनाग्नइत्यंत्यर्क्त्रिष्टुप्। त्वंनोअग्नेसन
यइत्यष्टमर्क्त्रिष्टुप्। इमामग्नेशरणिमितिषोडश्यृक्त्रिष्टुप्। त्वमग्नेप्रथमोअंगिराऋषिरितिजातवेदस्यमितिब्राह्मणस्तत्रयोः
॥ ॥इंद्रस्यपंचोना॥ ॥इंद्रस्यनुवीर्याणीतिपंचदशर्चंसूक्तं।१५ अनिरुक्तासंख्येति। हिरण्यस्तूपऋषिः। अनादेशात्इंद्रोदेव
१ अष्टमीषोडश्योत्रिष्टुभौभवतइतिवाक्यशेषः२

२८ ला॥ अनादेशात्त्रिष्टुप्छंदः॥ इंद्रस्य नु वीर्याणि प्रवोचमिति सूक्तं शंसतीति निष्केवल्यशस्त्रे ब्राह्मणस्त्रयोः॥ ॥ इतिश्रीमदृग्वेदानुक्रमणि
दीपिकायां डोरवलोपनामकृष्णभट्टसुतगणेशकृतौ प्रथमाष्टकस्य द्वितीयोध्यायः॥ ॥ एता॥ एतायामोपेति पंचदशर्चं सूक्तं॥ १५
पूर्ववत्सूक्तसंख्येति॥ हिरण्यस्तूप ऋषिः॥ अनादेशादिंद्रो देवता॥ अनादेशात्त्रिष्टुप्छंदः॥ एतायामोपगव्यंत इति सूक्तं माध्यंदिनसव
ने सूत्रकारः। ॥ त्रिश्चिद्द्वादशाश्विनं नवम्यंत्ये त्रिष्टुभौ। ॥ त्रिश्चिन्नो अद्येति द्वादशर्चं सूक्तं १२ हिरण्यस्तूप ऋषिः॥ अश्विनौ देवता॥ त्रिष्टु
बंतस्येति जागतं छंदः॥ क १ त्रीन्नक्तेति नवम्यृक् त्रिष्टुप्॥ आनो अश्विनेत्यंत्यर्क् त्रिष्टुप्॥ त्रिश्चिन्नो अद्येति सूक्तं प्रातरनुवाकानुमंत्र
णे सूत्रकारः॥ ह्वयाम्येकादश सावित्रं। नवमी जगत्याद्यस्ताल्लिंगोक्तदेवता पादशः॥ ह्वयाम्यग्निमित्येकादशर्चं सूक्तं ११ हिरण्यस्तूप ऋषिः
सविता देवता॥ अनादेशात्त्रिष्टुप्छंदः॥ हिरण्यपाणिः सवितेति नवम्यृक् जगती। ह्वयाम्यग्निमित्याद्यर्क् जगती। चकारात्सैवर्क् लिं
गोक्तदेवताः॥ चत्वारः पादाः पृथक्देवत्याः॥ एको ग्निः॥ द्वितीयो मैत्रावरुणः॥ तृतीयो रात्रिः॥ चतुर्थः सावित्रः॥ ह्वयाम्यग्निमिति विंशस्तके वैश्व
देवशस्त्रे सूत्रकारः॥ ॥ प्रवो विंशतिः कण्वो घौर आग्नेयं प्रागाथमूर्ध्व ऊषु यौ ऊर्ध्वौ॥ ॥ प्रवो यह्वमिति विंशत्यृचं सूक्तं। २०॥ घोरपुत्रः कण्व
ऋषिः॥ आप्रस्कण्वात्॥ देवत्वौ मिकित्वादे को बार्हतप्रगाथः सर्वत्र। दश प्रगाथा इत्यर्थः॥ ततः॥ ऊर्ध्व ऊषुणः॥ ऊर्ध्वो नः पाह्यंहस इ २७

तिद्वे ऋचौ यूपदेवत्यौ विनियोग ब्राह्मणस्त्रयोः॥ अस्य हृदस्य ब्राह्मणश्रुतौ मते आद्यर्क् उपरिष्टात् बृहती ज्ञेया। प्रवो यह्वमिति सूक्तं प्रातरनुवाका
नुमंत्रणे सूत्रकारः। ॥ क्रीळं पंच नामारुतं हिगायत्रं तु। क्रीळं वः शर्ध इति शर्द्ध इति पंचदशर्चं सूक्तं १५ अनिरुक्तासंख्येति। कण्व ऋषिः॥ मरुतो
देवता॥ हिशब्दात्त्रीणि सूक्तानि मारुतानि। गायत्रीं छंदः॥ तुशब्दात् उत्तरसूक्तं गायत्रं। क्रीळं वः शर्द्धो मारुतमिति ब्राह्मणश्रुतिः॥ कद्ध।
कद्धनूनमिति पंचदशर्चं सूक्तं १५ पूर्ववत्सूक्तसंख्येति। कण्व ऋषिः॥ हिशब्दात् मरुतो देवता। तुशब्दात् मरुतो देवता। तुशब्दात् गाय
त्री छंदः॥ कद्धनूनमिति सूक्तं स्वाध्यायधर्मः॥ प्रयद्दश प्रगाथं तु॥ प्रयदित्थेति दशर्चं सूक्तं १० कण्व ऋषिः॥ हिशब्दात् मरुतो देवता॥ अना
देशात् बार्हतं प्रगाथं छंदो बृहतीसतो बृहत्यौ। पंच प्रगाथ इत्यर्थः॥ तुशब्दात् उत्तरसूक्तं प्रगाथं। प्रयदित्थेति सूक्तं स्वाध्यायधर्मः॥ उ
त्तिष्ठाष्टौ ब्राह्मणस्पत्यं। उत्तिष्ठ ब्रह्मणस्पत इत्यष्टर्चं सूक्तं। ८। कण्व ऋषिः॥ ब्रह्मणस्पतिर्देवता॥ अस्येति ब्राह्मणस्पत्यं। तुशब्दात् बा
र्हतप्रगाथं छंदो बृहतीसतो बृहत्यौ। चत्वारः प्रगाथा इत्यर्थः॥ उत्तिष्ठ ब्रह्मणस्पत इति ब्राह्मणस्पत्य इति ब्राह्मणस्त्रयोः। ॥ यं रक्षं
ति नव वरुणमित्रार्यम्णां मध्ये तृच आदित्येभ्यो गायत्रं हि। यं रक्षंतीति नवर्चं सूक्तं। ९। कण्व ऋषिः॥ सूक्तस्य तिस्रो देवताः॥ एको वरुणः
द्वितीयो मित्रः॥ तृतीयोर्यमेत्यादि। नत्र मग्नः पंथा अनृक्षर इति मध्यमस्तृच आदित्यदेवतेति। गायत्रीं छंदः॥ हिशब्दात्त्रीणि सूक्ता

॰ वराब्दव्रिस्वान्देवानरुद्रंनसमुच्चिनोति। तथाचोक्तं। मित्रेणवरुणेनात्रविश्वेदेवैःश्वसंस्तुतइति॰

निगायत्राणि।मरसंतिसूक्तंकस्याध्यायधर्मः संप्रपन्दशपोष्टं। संप्रपन्नितिदशर्चंसूक्तं१० कण्वऋषिः।पूषादेवता।हिशब्दात्गायत्रीछं

दः।संप्रपन्नध्वनइतिमहांतमितिगृह्यते। ।कद्रुद्रायनवरौद्रं।तृतीयामैत्रावरुणीत्यांत्यस्तृचः।सौम्यांत्यानुष्टुप्। ।कद्रुद्रायेतिनव

२८ ऋचंसूक्तं९ कण्वऋषिःरुद्रोदेवता।अस्येतिरौद्रं।हिशब्दात्गायत्रीछंदः।ततःयथानोमित्रोवरुणइतितृतीयर्कमैत्रावरुणदेव

त्या।चेकारात्वरुद्रदेवत्या।अस्मेसोमश्रियमिसंत्यस्तृचः।सोमदेवत्यः।शंतेभजाइत्यंत्यर्क्।अनुष्टुप्।चतस्रोदशउपतिष्ठेतक

दुद्रायेतिगृह्यते। अग्नेपक्तनाप्रस्कण्वःकाण्वआग्नेयंतुप्रगाथमाधोद्वृचोभ्युषसांच।अग्नेविवस्वदितिचतुर्दशर्चंसूक्तं।१४॥

अनिरुक्तासंख्येति।कण्वपुत्रःप्रस्कण्वऋषिःआसव्यावसप्तसूक्तानिप्रस्कण्वऋषिरपश्यत्।अग्निर्देवता।तुशब्दात्उत्तरसूक्तमाग्नेयं।अना आद्यःप्रथमःद्वृचोश्वि

देशात्बार्हतप्रगाथंछंदोबृहतीसतोबृहत्यौ।सप्तप्रगाथाइत्यर्थः।ततः अग्नेविवस्वदित्याद्येद्वृचत्वावश्विन्यावुषस्यौसैवदेवदेवते नोउषसांच अश्विनौच

ति।नकारात्अनिरुक्त्यौअग्नेविवस्वदितिसूक्तंप्रातरनुवाकानुमंत्रणेसूत्रकारः। ।त्वमग्नेदशानुष्टुभमर्द्धचांत्योदेवः ।त्वमग्नेवसूनि तीनिवाअग्नेवुविशानि मीरुपसइतिचेतना

तिदशर्चंसूक्तं१० प्रस्कण्वऋषिः।तुशब्दात्अग्निर्देवता।अनुष्टुप्छंदः। ततःअयंसोमःकृदानवइत्यंत्यौधर्चौदेवोदेवदेवत्यः।त्वमग्नेवसूनि

तिसूक्तंप्रातरनुवाकानुमंत्रणेसूत्रकारः। एषोपंच्चनाश्विनंतुगायत्रं। एषोउषाइतिपंचदशर्चंसूक्तं।१५ अनिरुक्तासंख्येति।प्रस्कण्व २८

गायत्रेश्विनत्।पदानि।चतोयादसा।हविषाजारः।आदारः।आनस्विरः

ऋषिःअश्विनौदेवताअस्येत्याश्विनं।गायत्रीछंदः। एषोउषाइतिसूक्तंप्रातरनुवाकानुमंत्रणेसूत्रकारः॥ ॥इतिश्रीमदृग्वेदानुक्रमणि

दीपिकायांतृतीयाष्टकप्रथमाष्टकेतृतीयोध्यायः॥ ॥अयंदशप्रगाथंतु॥अयंवामितिदशर्चंसूक्तं१० प्रस्कण्वऋषिः।तुशब्दात्अश्वि

नौदेवता।अनादेशात्बार्हतप्रगाथंछंदोबृहती।सतोबृहत्यौ।पंचप्रगाथाइत्यर्थः।तुशब्दात्उत्तरसूक्तंप्रगाथं।अयंवांमधुमत्तमइति

सूक्तंप्रातरनुवाकानुमंत्रणेसूत्रकारः॥ ॥सहवोकशोषस्यंतु॥ ॥सहवामेनेतिषोडशर्चंसूक्तं।१६।प्रस्कण्वऋषिःउषादेवता॥ तु

शब्दात्उत्तरसूक्तमुषस्यं।तुशब्दात्बार्हतप्रगाथंछंदोबृहतीसतोबृहत्यौ।अष्टौप्रगाथाइत्यर्थः।सहवामेनेतिबार्हतंसूक्तंप्रातर

नुवाकानुमंत्रणेसूत्रकारः।उषस्तच्चित्रमानुष्टुभंतु। ।उषोभद्रेभिरितिचतुर्ऋचंसूक्तं।४।प्रस्कण्वऋषिः।तुशब्दात्उषादेवता।अनुष्टुप्

छंदः।तुशब्दात्उत्तरसूक्तमानुष्टुभं।उषोभद्रेभिरित्यानुष्टुभमितिप्रातरनुवाकानुमंत्रणेसूत्रकारः। ।उदुत्यंसप्तोनासौर्यं।नवाद्यो

गायत्र्योत्यास्तृचोरोगघ्नउपनिषदंत्योर्धर्चोद्विषघ्नः।उदुत्यमितित्रयोदशर्चंस्यसूक्तस्य।१३।अनिरुक्तासंख्येति।प्रस्कण्वऋषिः।सूर्योदे

वता।ततउदुत्यमित्याद्यानवगायत्र्यः।तुशब्दात्उद्वयंतमसस्परीत्यंत्यास्तिस्रोनुष्टुभः।ततउद्यन्नद्येत्यंत्यस्तृचोरोगघ्नः।सर्वशां

तिकरोयंदृष्टउपनिषत्।गुह्योपनिषदित्यर्थः।वक्ष्कारिका।रोगापनुत्तिमाधाभ्यासुद्यन्निक्षचरेत्कचे।रोगापनुत्तिमन्निषन्नुद्या

अर्धर्चेतुद्विपदेष्वैंद्रःसव्यःशतर्चिषु।

ध्यामुपनिषद्वचरेद्वचने। रोगापनुत्तिमान्विष्यन्नुपनिषत्यभिरुक्तम्।इति। तेनः द्विषंतंमह्यमित्यत्योऽधर्चो द्विषघ्नः शत्रुनाशकइत्यर्थः। कारिका।
अर्धर्चेतुद्विषद्वेषऐंद्रःसव्यःशतर्चिषिति। उपनिषदित्येकस्मैरहस्यपर्वेएकेवक्तव्यमितिगुह्योपनिषदित्युच्यते। रहस्यते। तथापंचमारण्यके
द्वैस्मेवएकएकस्मैप्रब्रूयादितिहस्माहजातूकर्ण्योनवतेभ्यन्नतृतीयइति। उपनिषत्संज्ञामारण्यकेधर्मप्राप्यते। नह्यरण्येदिवाध्ययनंप्राप्तं।
ति।तदृष्टमेवसंगृहीतं। सौर्यत्वादेवाध्ययनंदिवैव। नरात्रौ। उक्तंहि। ठादिनेसौर्याणिप्रातःपठेतइतिस्मृतिवचनात्। सूर्योनोदिवस्पात्वित्या
दौत्स्वनृचौरसौर्यत्वसिद्ध्यर्थंसौर्याणीतिशब्दतएवांदिवैवाध्ययनंयथास्यादितिवैकृतमिति। उत्तरचाप्युपनिषदित्युक्तेरेतदेवप्रयोजनं। न
थाआधाग्नर्भस्मादिष्णुपनिषदित्यादि। उपेत्यनियमयुक्तास्साध्यते। उपादेशातइत्यर्थः। अस्त्यपनिषत्वेएकःश्रोताद्दक्षिणतोनिषीदतिय
तिशास्त्रेदर्शनात्। सौर्याणीतिदिवाध्ययनंप्रशस्तं। रात्रावध्ययनंनिषिद्धमित्यर्थः। जातवेदसमितिसौर्यपर्यायः। त्वंवरुणेतिवरुणशब्दो
पिन्वेति। उदुत्यंजातवेदसमितिद्वितीयंशंसतीतिब्राह्मणकृतिः। अभित्यंपंचोनासव्योद्वित्रिष्टुब्वंतमांगिरसइंद्रतुल्यंपुत्रमिच्छन्नपश्यद्ध्यायत्सव्य
इतींद्रएवास्यपुत्रोऽजायत।। अभित्यंमेषमितिपंचदशर्चंसूक्तं१५ आनिरुक्तासंख्येति। आंगिरसःपुत्रःसव्योनामऋषिः। अनुक्रमांगि २८
रसांविद्यादितिवचनात्।। यावन्नोध्यान्तऋषिदर्शनात्सव्यसूक्तानितावत्सव्यऋषिरपश्यत्। अनादेशादिंद्रोदेवता।। त्रिष्टुबंतस्येतिजागतं

निगदमिद्धमेतत्। बृहद्देवतायांचोक्तं। स्वयमिंद्रसमंपुत्रमिच्छन्नांगिरसोमुने। वस्कंतसव्योमत्वर्थेयोगित्वांपुत्रतांगतइति॥

छंदः। ततःइंद्रोऽभ्यस्यामीत्यंत्येद्वेऋचौत्रिष्टुभौ।। आतात्महारसः स्वयमेवांगिरसःपुत्रमिच्छंतः सव्यनामेंद्रःपुत्रत्वेनजनायते। सम्यकपुत्रोत्पन्नऐवेंद्र
तुल्यमिति। अभित्यंमेषंपुरुहूतमृग्मियमितिसूक्तंब्राह्मणस्तुत्र्योः। त्यंसुमेचयोदश्यंत्येत्रिष्टुभौ। त्यंसुमेषमितिपंचदशर्चंसूक्तं१५ पूर्ववत्सूक्त
संख्येति। सव्यऋषिः। अनादेशादिंद्रोदेवता। त्रिष्टुबंतस्येतिजागतंछंदः। त्वंसुवःप्रतिमानमितित्रयोदश्यऋक्त्रिष्टुप्। अर्वन्नतेत्यंत्यकेत्रिष्टुप्
त्यंसुमेषंमहयेतिसूक्तंब्राह्मणस्तत्र्योः। न्यूषेकादशांत्येत्रिष्टुभौ।। न्यूषुवाजमित्येकादशर्चंसूक्तं११ सव्यऋषिः इंद्रोदेवता। अनादेशात्। त्रिष्टु
बंतस्येतिजागतंछंदः। ततःत्वमाविथसुश्रवसमित्यंत्येद्वेऋचौत्रिष्टुभौ।। न्यूषुवाजमितिसूक्तंरात्रपर्यायशस्त्रेस्तत्रकारः। मानोस्मात्रिष्टुप्षष्ठ्य
ष्टमीनवमीच। मानोअस्मिन्नित्येकादशर्चंसूक्तं११।। पूर्ववत्सूक्तसंख्येति। सव्यऋषिः। अनादेशादिंद्रोदेवता। त्रिष्टुबंतस्येतिजागतंछंदः। स
रोबृधमित्यंत्यकत्रिष्टुप्। चकारादत्वमाविथेतिषष्ठ्यूर्ध्वत्रिष्टुप्। असमंक्षत्रमित्यष्टम्यत्रिष्टुप्। असमंक्षत्रमितिष्टम्कत्रिष्टुप्। तुभ्येदेते
नवम्यक्।= मानोअस्मिन्मघवन्नितिरात्रपर्यायशस्त्रेस्तत्रकारः। दिवश्चिदस्येजागतंहि। दिवश्चिदस्येत्यष्टर्चंसूक्तं।८।सव्यनामऋषिःअ
नादेशादिंद्रोदेवता। जगतीछंदः। हिशब्दात्त्रीणिसूक्तानिजागतानि। दिवश्चिदस्यवरिमेतिसूक्तंब्राह्मणस्तत्र्योः। एषप्रपद्। एषप्रपूर्वी
रितिषड्र्चंसूक्तं६ सव्यऋषिः। अनादेशादिंद्रोदेवता।। हिशब्दात्जागतंछंदः। एषप्रपूर्वीरितिसूक्तंदिवाकीर्तिनिष्केवल्यशस्त्रेस्तत्रकां
असमंक्षत्रमितिकेचनतुषष्ठीचेतिपठंति। तदनुपपन्नं। शौनकाचार्यवचनात्। तेनप्रोक्तं। त्रिष्टुभोमागतेसाब्देनतीयस्यत्वमाविथ। तुभ्येदेते असमंक्षत्रं। इंद्रोअश्रायि त्वंभुवइति नवम्तीयस्य
स्वमाविथसश्रवसमित्यस्यैवग्रहणं नतुत्वमाविथेनर्यमिति। चतुर्थत्वादस्यसूक्तस्य = २

३० प्रमंहिष्ठाय॥प्रमंहिष्ठायेतिपंचदशर्चंसूक्तं।६॥पूर्ववत्सूक्तसंख्येति।सव्यनामऋषिःअनादेशात्इंद्रोदेवता॥हिशब्दात्जागतंछंदः॥प्रमंहिष्ठा
येतिसूक्तमुक्तपर्यायशस्त्रेसूत्रकारः॥प्रमंहिष्ठीयेनप्रणयेदित्याङ्गिरसब्राह्मणश्रुतिः॥नूचित्सवनोधागोतमआग्नेयंहित्रिष्टुबंतं।॥नूचित्स
होजाइतिनवर्चंसूक्तं।८गोतमपुत्रोनोधानामऋषिः।आपाराशरात्सप्तसूक्तानिनोधाऋषिरपश्यत्।अग्निर्देवता॥हिशब्दात्त्रीणिसूक्तान्याग्नि
देवत्यानि।त्रिष्टुबंतस्येतिजागतंछंदः।दधुष्ट्वाभृगवइत्याद्यंत्याश्चतस्रस्त्रिष्टुभः।नूचित्सहोजाइतिसूक्तमाग्निमारुतशस्त्रेसूत्रकारः॥ ॥वयाइ
दग्नवैश्वानरीयं॥ ॥वयाइदग्नइतिसप्तर्चंसूक्तं।७नोधाऋषिः।हिशब्दात्वैश्वानरोग्निर्देवता।वैश्वानरइत्यग्नेर्गुणः।अनादेशात्त्रिष्टुप्छं
दः॥वयाइदग्नइतिसूक्तंस्वाध्यायधर्मः॥ ॥वह्निंपंच॥ ॥वह्निंयशसमितिपंचर्चंसूक्तं।५।नोधाऋषिः।हिशब्दात्अग्निर्देवतेतिवैश्वानरी
यं॥अनादेशात्त्रिष्टुप्छंदः।वह्निंयशसमितिसूक्तंप्रातरनुवाकानुमंत्रणेसूत्रकारः॥ ॥अस्माइदुषोळश॥ ॥अस्माइदुप्रतवसइतिषोळ
शर्चंसूक्तं।१६।नोधाऋषिः।अनादेशात्इंद्रोदेवता।अनादेशात्त्रिष्टुप्छंदः।अस्माइदुप्रतवसेतुरायेतिनोधास्त्वएतेप्रातःसवनइतिब्रा
ह्मणसूत्रयोः॥ ॥इतिश्रीमदृग्वेदानुक्रमणिदीपिकायांप्रथमाष्टकेचतुर्थोध्यायः॥ ॥प्रमन्महे॥प्रमन्महइतित्रयोदशर्चंसूक्तं१३ प्रमन्महइतिसूक्तंस्वाध्यायधर्मः।त्वंनव।त्वंमहांइंद्रेति ३०
अनिरुक्तासंख्येति।नोधाऋषिः।अनादेशात्इंद्रोदेवता।अनादेशात्त्रिष्टुप्छंदः।

५ दशर्चंशौनकाचार्यमतेतुपंचर्चं।पराण्यन्यत्वार्यपितत्सदभिधायेनैवाल्कंविंशत्।अन्यैःकाधिकाषड्विंशत्यभिप्रायेणपराशरऋषिरपश्यत्।शक्तिपुत्रःआगोतमाद्राङ्गणात्।नकमनुक्रमेवा।हैपदंदव।५
नवर्चंसूक्तं।८नोधाऋषिःअनादेशात्इंद्रोदेवता।अनादेशात्त्रिष्टुप्छंदः।त्वंमहांइंद्रयोहशुष्मैरितिसूक्तमितिब्राह्मणसूत्रयोः॥ वृष्णेपंचेनामा
रुतंत्रिष्टुबंतं।वृष्णेशर्धायेतिपंचदशर्चंसूक्तं।१५।अनिरुक्तासंख्येति।नोधाऋषिःमरुतोदेवताअस्येदमारुतं।त्रिष्टुबंतस्येतिजागतंछंदः।वृष्णिरं
मरुतइत्यंत्यर्कत्रिष्टुप्।वृष्णेशर्धायस्कमरवायवेधसइतित्यग्निमारुतमितिब्राह्मणसूत्रयोः॥ ॥अथपरिभाषते॥ ॥परमाग्नेयमैंद्रात्॥ ॥प
रमाग्नेयमित्यत्रपश्वानेत्यादि।परंपंचदशसूक्तान्याग्नेयानिवेदितव्यानि।आइंद्रात्।इत्थाहिसोमइतिसूक्तमित्यंतइंद्रदर्शनात्आग्नेयामीत्य
र्थः।पश्वादशपराशरःशाक्त्योद्विपदंतत्।पश्वानतायुमितिदशर्चंसूक्तं१०॥द्विद्विपदास्त्वृचःसमामनंतीतिपरिभाषावचनात्।अध्यापनेपंचर्चं
सूक्तंज्ञेयं।५।तत्शब्दात्षट्सूक्तानिद्विपदानि।पश्वानतायुमित्यादिवनेमपूर्वीरित्यंततःसर्वाद्विपदानीय।शक्तिपुत्रःपराशरऋषिःशाक्त्य
पाराशर्यौतसूत्रकारः।आगोमतमात्।नवसूक्तेषुपराशरऋषिरपश्यत्।अग्निर्देवता।अनादेशात्विंशत्यक्षराद्विपदाविराट्छंदः।विंशिकाद्वि
पदाविराजइतिपरिभाषावचनात्।पश्वानतायुमितिद्विपदमितिसूत्रकारः रयिः।रयिर्नचित्रेतिदशर्चंसूक्तं१०पूर्ववत्सूक्तसंख्येति।पराश
रऋषिःअग्निर्देवता।तत्शब्दात्विंशत्यक्षराद्विपदाविराट्छंदः।रयिर्नचित्रेतिसूक्तंस्वाध्यायधर्मः॥वनेषु।वनेषुजायुरितिदशर्चंसूक्तं१०पूर्व
वत्सूक्तसंख्येति।पराशरऋषिःअग्निर्देवता।तत्शब्दात्विंशत्यक्षराद्विपदाविराट्छंदः।वनेषुजायुरितिसूक्तंस्वाध्यायधर्मः॥ श्रीणन्
श्रीणन्नुपस्थादितिदशर्चंसूक्तं१० पूर्ववत्सूक्तसंख्येति।पराशरऋषिः।अग्निर्देवता।तत्शब्दात्विंशत्यक्षराद्विपदाविराट्छंदः।श्रीणन्नु

पस्मादग्निस्सूक्तं स्वाध्यायधर्मः। शुक्रः। शुक्रः शुशुक्वानितिदशर्चं सूक्तं १० पूर्ववत्सूक्तसंख्येति। पराशरऋषिः अग्निर्देवता। ततशब्दाभावेविंश
२१ त्यक्षराद्विपदाविराट् छंदः। शुक्रः शुशुक्वानितिसूक्तं स्वाध्यायधर्मः ॥वनेमैकादश॥ ॥वनेमपूर्वीरित्येकादशर्चं सूक्तं। ११॥ पराशरऋ
षिः अग्निर्देवता। ततशब्दाभावेविंशत्यक्षराद्विपदाविराट् छंदः अध्यापने अयुक्षत्वाद्द्विपदे वा वचनात्साधुर्न गृध्नुरित्यंत्यर्क् द्विपदा इत्यर्थः
द्विर्द्विपदास्तृचः पञ्चेपञ्चवानेया द्विपदू सूक्तानि चतुष्पदाविराट् पंक्तानि। अथ चतुष्पदा विराट् दशकेऽशिति परिभाषेयं॥ इति द्विपदा
सूक्तमवधिः॥ वनेम पूर्वीरिति सूक्तं स्वाध्यायधर्मः॥ ॥उपप्रदश॥ ॥१०॥ उपप्रजिन्वन्निति दशर्चं सूक्तं १०॥ पराशरऋषिः। अग्निर्देवता।
अनादेशात्त्रिष्टुप् छंदः। उपप्रजिन्वन्निति त्रीणि प्रातरनुवाकानुमंत्रणे सूत्रकारः॥ ॥निकाव्या॥ निकाव्या वेधस इति दशर्चं सूक्तं १० पूर्व
वत्सूक्तसंख्येति। पराशर ऋषिः। अग्निर्देवता। अनादेशात्त्रिष्टुप् छंदः। निकाव्येति सूक्तं स्वाध्यायधर्मः। रयिर्न। रयिर्न यइति दशर्चं सू
क्तं १०॥ पूर्ववत्सूक्तसंख्येति। पराशरऋषिः अग्निर्देवता। अनादेशात्त्रिष्टुप् छंदः। रयिर्न यइति सूक्तं स्वाध्यायधर्मः। उपप्रयंतोनवगोतमोरा
हूगणो गायत्रं तु। उपप्रयंत इति नवर्चं सूक्तं ९। रहूगणपुत्रो गोतम ऋषिः। आ षोडशकुत्सात् विंशति सूक्तानीमं स्तोमम् अर्हत इत्यंतानि गो
तम ऋषिरपश्यत्। अग्निर्देवता। गायत्री छंदः तुशब्दात् उत्तरसूक्त गायत्रं। उपप्रयंत इति सूक्ते द्वे प्रातरनुवाकानुमंत्रणे सूत्रकारः। जु २१

षस्व पंच॥ जुषस्व सप्रथस्तममिति पंचर्चं सूक्तं ५। गोतम ऋषिः अग्निर्देवता। तुशब्दात् गायत्री छंदः। जुषस्व सप्रथस्तममित्यन्वाहेति ब्राह्मण
सूत्रयोः। काते। कात उपेतिरिति पंचर्चं सूक्तं। ५। पूर्ववत्सूक्तसंख्येति। गोतम ऋषिः। अग्निर्देवता। अनादेशात्त्रिष्टुप् छंदः। कात उपेतिरिति सूक्तं
प्रातरनुवाकानुमंत्रणे सूत्रकारः कथा। कथा दाशेमेति पंचर्चं सूक्तं ५ पूर्ववत्सूक्तसंख्येति। गोतम ऋषिः। अग्निर्देवता। अनादेशात्त्रिष्टुप्
छंदः। कथा दाशेमेति सूक्तं प्रातरनुवाकानुमंत्रणे सूत्रकारः अभित्वा गायत्रं तु। अभित्वा गोतम इति पंचर्चं सूक्तं॥५॥ पूर्ववत्सूक्तसंख्येति॥
गोतम ऋषिः। अग्निर्देवता। गायत्री छंदः। तुशब्दात् उत्तरसूक्तं गायत्रं। अभित्वा गोतमा इति सूक्तं स्वाध्यायधर्मः। हिरण्यकेशो द्वादश॥
द्यौव्यचौ चैत्रिष्टुभौ षष्ठ्यै पूर्वी आग्नेय्येवा मध्यमा चेत्॥ हिरण्यकेशो रजस इति द्वादशर्चं सूक्तं १२ १२। गोतम ऋषिः। अग्निर्देवता। हिरण्यकेश
इति प्रथमतृचस्त्रैष्टुभः। अग्ने वाजस्य गोमत इति द्वितीयस्तृच औष्णिहः। हिरण्यकेशः पूर्वस्तृचः शुद्धाग्निदेवत्यः। अथ वा धामछत्
गुणोग्निर्मध्यमायां वैघृतान्येव वा। शुद्धोग्निरग्निर्धामछदिति विकल्पते। वैघृत एवं मध्यम इति। तुशब्दात् शेषाः षळृचो गायत्र्यः॥
हिरण्यकेशो रजसो विसार इति द्वे ब्राह्मणसूत्रयोः आग्नेयाधिकारस्य पूर्णावधिः। अच्छा पाव्यैरोंद्रं पांक्तं हि। या मित्यस्यानि पाथितो दध्यङ्
मनुरथर्वा चेति। इहाहि सोम इति षोळशर्चं सूक्तं १६ गोतम ऋषिः इंद्रो देवता। पंक्ति छंदः। हिशब्दात् त्रीणि सूक्तानि पांक्तानि। याम

थर्वेत्यस्यास्ति। दध्यङ् मनुः। अथर्वेति त्रीणि निपातितानीति। इत्था हि सोम इन्मद इति सूक्तं महत्पांक्तमिति ब्राह्मणसूत्रयोः॥ ॥इति श्रीम
३२ दृग्वेदानुक्रमणिदीपिकायां ऋ० क० गणेशकृतौ प्रथमाष्टकस्य पंचमोऽध्यायः॥ ॥इंद्रो नवा॥ इंद्रो मदायेति नवर्चं सूक्तं ८। गोतमऋषिः
अनादेशात् इंद्रो देवता। हि शब्दात् पंक्तिछंदः। इंद्रो मदाय वावृध इति सूक्तं ब्राह्मणसूत्रयोः॥ उपोषु षड्जागतं तं॥ उपोषु शृणुहीति षडृचं सूक्तं ६
गोतमऋषिः। अनादेशात् इंद्रो देवता। हि शब्दात् पंक्तिछंदः। युनज्मि ते ब्रह्मणेत्यंत्यर्क् जगती। उपोषु शृणुहीति सूक्तं षोळशीशस्त्रे ब्राह्मणसूत्र
योः अश्वावति जागतं। अश्वावति प्रथम इति षडृचं सूक्तं ६। पूर्ववत् सूक्तसंबंधेति। गोतम ऋषिः। अनादेशात् इंद्रो देवता। जगती छंदः
अश्वावति प्रथम इति सूक्तं स्वाध्यायधर्मे। असावि विंशतिः षळनुष्टुभ औष्णिहपांक्तगायत्रत्रैष्टुभास्तृचाः। प्रगाथः॥ असावि सोम इति
विंशत्यृचं सूक्तं २०। गोतमऋषिः। अनादेशात् इंद्रो देवता। असावि सोम इत्याद्याः षळृचोऽनुष्टुभः। ततः य एक इदित्यौष्णिहस्तृचः। ततः स्वादो
रित्थेत्यादि पांक्तस्तृचः। ततः इंद्रो दधीच इत्यादि गायत्रस्तृचः। ततः को अद्य युंक्त इत्यादि त्रैष्टुभस्तृचः। एते चत्वारस्तृचाः पृथक्छंदस्काः।
मा॥ ततः त्वमंग प्र शंसिष इत्यंते द्वे ऋचौ मीलित्वैकोऽनादेशात् बार्हतप्रगाथो बृहतीसतोबृहत्यौ। असावि सोम इंद्र त इति षोळशीशस्त्रे स्तो
त्रियानुरूपाविति सूत्रकारः। प्रये द्वादश मारुतं ह पंचम्यंत्ये त्रिष्टुभौ। प्रये शुंभंत इति द्वादशर्चं सूक्तं १२ गोतमऋषिः। मरुतो देवता। ३२

ह शब्दात् चत्वारि सूक्तानि मरुद्देवत्यानि। त्रिष्टुबंतस्येति जागतं छंदः। प्र यद्रथेष्विति पंचम्यृक् त्रिष्टुप्। या वः शर्मेत्यंत्यर्क् त्रिष्टुप्। प्रये शुंभंते जनय इ
त्याग्निमारुतशस्त्रे सूत्रकारः। मरुतो दश गायत्रं। मरुतो यस्येति दशर्चं सूक्तं १० गोतमऋषिः ह शब्दात् मरुतो देवता। गायत्री छंदः। मरुतो य
स्येत्याग्निमारुतशस्त्रे ब्राह्मणसूत्रयोः। प्रत्वक्षसः षड्जागतं॥ प्रत्वक्षस इति षडृचं सूक्तं ६॥ गोतमऋषिः ह शब्दात् मरुतो देवता। जगती
छंदः। प्रत्वक्षसः प्रतवस इति सूक्तमाग्निमारुते शस्त्रे ब्राह्मणसूत्रयोः। आ विद्युन्मद्भिराद्यांत्ये प्रस्तारपंक्ती पंचमी विराड्रूपा। आ विद्युन्मद्भिरिति
षडृचं सूक्तं ६ पूर्ववत् सूक्तसंबंधेति गोतमऋषिः ह शब्दात् मरुतो देवता। अनादेशात् त्रिष्टुप् छंदः। ततः आ विद्युन्मद्भिरित्याद्यर्क् तथा ए
षास्मा वद इत्यंत्यर्क् एते द्वे ऋचावाद्यांत्ये प्रस्तारपंक्ती पंक्तिछंदः। आद्यौ चेत् द्वादशाक्षरावंत्यावष्टाक्षराविति अर्थः। ततः एतत्संयोजनमिति पं
चम्यृक् विराड्रूपा त्रिष्टुप् छंदः। एकादशिनस्त्रयोऽष्टकश्चेति। आ विद्युन्मद्भिरिति सूक्तं स्वाध्यायधर्मे। आ नो दश वैश्वदेवं तु पंचाद्याः
सप्तमी च जगत्यः षष्ठी विराट्स्थाना। आ नो भद्रा इति दशर्चं सूक्तं १० गोतमऋषिः। विश्वेदेवा देवता। तु शब्दात् उत्तरसूक्तं वैश्वदेवं। वि
विदेवाः सर्वे देवा इति श्रुतेः। आ नो भद्रा इत्याद्याः पंच सप्तमी च जगत्यः। च कारात् पृषदश्वा मरुत इति सप्तम्यृक् जगती। स्वस्ति न इंद्र इति
षष्ठीत्वृक् विराट्स्थाना त्रिष्टुप् एवं नवको वैराजस्त्रैष्टुभश्चेति। भद्रं कर्णेभिरित्याद्याः शिष्टास्तिस्रोऽनादेशात् त्रिष्टुभः। अ

दितिर्द्यौरित्यंत्यर्क्। आसीत्तदैवतेति। आदितिर्द्यौरदितिरंतरिक्षमित्यपरिधानीयादिति ब्राह्मणसूत्रयोः। तथा यास्केनैरुक्ते अदितिरदीना देवमा
२२ तेति वचनात्। आ नो भद्राः क्रतवो यंतु विश्वत इति नव वैश्वदेवं शाक्त्यसूत्रकारः। ऋजुनीतीनव गायत्र्यंत्यानुष्टुप्। ऋजुनीती न इति नव वैश्वंसूक्ते
गोतमऋषिः तु शब्दात् विश्वेदेवा देवता। गायत्री छंदः शन्नो मित्र इत्यंत्यर्क्। अनुष्टुप्। ऋजुनीती नो वरुण इति मैत्रावरुणस्येति ब्राह्म
णसूत्रयोः। त्वं सोमस्याधिकारः सौम्यं पंचम्यादि गायत्र्यो द्वादश उष्णिक् च। त्वं सोम प्रचिकित इति त्रयोविंशत्यर्चं सूक्तं॥ २२॥ अनिरुक्तसंख्ये
ति॥ गोतमऋषिः सोमो देवता। अस्येति सौम्यं त्वं सोमासि सत्पतिरिति पंचम्यादि द्वादशार्चं च गायत्र्यः। आप्यायस्व समेतु त इत्युक्त का
रात् उष्णिक्। शिष्टास्त्वनादेशात्त्रिष्टुभः। त्वं सोम प्रचिकितो मनीषेति दृष्टत्वापादे धामानीति ब्राह्मणसूत्रयोः। एता उत्या इत्यूनो
षस्यं च तु जगत्यादिष्टुष्णिगंतत्वेत्य आश्विनः। एता उत्या इत्यष्टादशर्चं सूक्तं १८॥ अनिरुक्तसंख्येति गोतमऋषिः उषा देव
ता। अस्यत्कषस्यं। ततः एता उत्या इत्याद्याश्चतस्रो जगत्यः। ततः उपस्तचित्रमासिरेत्याद्यास्त्वाः षट्क्र्च उष्णिहः। शिष्टामत्यर्गिरि
त्याद्याम ष्टर्चा अनादेशात् त्रिष्टुभः। ततः अश्विनावर्तिरस्मदेत्यंत्यस्तृचो अश्विनो देवतेति। एता उत्या इति चतस्रो जागतमिति घात २२
रनुवाकानुमंत्रणे सूत्रकारः। अग्नीषोमो द्वादशाग्नीषोमीयमाद्यास्तिस्रोऽनुष्टुभ उपांत्यास्तिस्रो गायत्र्योऽष्टमी जगती। अग्नीषोमावि

ष्टमीति द्वादशर्चं सूक्तं १२ गोतमऋषिः। अग्नीषोमौ देवते स्येत्यग्नीषोमीयं। अग्नीषोमावित्याद्यास्तिस्रोऽनुष्टुभः। ततः अग्नीषोमासवे
दसेत्याद्युपांत्यास्तिस्रो गायत्र्यः। ततः यो अग्नीषोमेत्यष्टम्यृक् जगती विकल्पेन। शिष्टाः पंचर्चोऽनादेशात्त्रिष्टुभः। अग्नीषोमाविमं सु मे
युवं मेता नि दिवि रोचनानीति त्वचावितिसूत्रकारः॥ ॥इमं षोडश कुत्स आग्नेयं तत्त द्वि त्रिष्टुबंतं। पूर्वे देवास्त्रयः पादा देवास्तन्नो मित्रो
धर्चो लिंगोक्तदेवतोपदेवत्यं वा सूक्तं॥ ॥इमं स्तोमम् अर्हत इति षोडशर्चं सूक्तं १६ आंगिरसपुत्रः कुत्सऋषिः अनुक्तगोत्रमांगिरसंभ
द्यादिति वचनात्। आ कक्षीवतात्त्रीणि सूक्तान्युद्धृत्य जातवेदस एकः स यो वृषा द्वितीयः चंद्रमा अप्स्वंतरिति तृतीयः एतत्सूक्तत्र
यी सूक्तानि। नासत्याभ्यां बर्हिरिवेत्यंतान्येकविंशति सूक्तानि कुत्स ऋषिरपश्यत्। तत्र चंद्रमा सूक्तं विकल्पेनेत्यर्थः। अग्निर्देवता। तत्शब्द
न्यद् सूक्तान्याग्निदेवत्यानि। त्रिष्टुबंतस्यापि जागतं छंदः। ततः यमेत्वमित्याद्यंत्ये द्वे ऋचौ त्रिष्टुभौ। पूर्वो देवा इत्यृक् त्रयः पादा देवदेवा तेवि
तन्नो मित्रो वरुण इत्यंत्योऽर्धर्चो मित्रादिलिंगोक्तदेवतः विकल्पेन यद्देवत्यं वा सूक्तं तद्देवतेति। इमं स्तोममर्हते जातवेदस इति जातवेस
दस्यमित्यारण्यके महाव्रते॥ ॥इति श्रीमद्ऋग्वेदानुक्रमणिदीपिकायां डोरखलोपनामक लक्ष्मणभट्टसुत गणेशाकृतौ प्रथमाष्टकस्य
षष्ठोऽध्यायः॥ ॥ हे एकादशोषस्य यवाग्नेय॥ ॥ होनूपेइत्येकादशर्चं सूक्तं ११ कुत्सऋषिः उषोग्निर्देवता। उषसः शब्दोग्रेगुणः

तत्शब्दात् रउद्गाग्निर्देवता। अनादेशात्त्रिष्टुप्छंदः। द्वेविरूपेइतिसूक्तेसप्तत्यासहैव भ्रातरनुवाकनुमंत्रणेसनकारः। सप्तत्यानचद्रविणोद
३४ से॥ सप्तत्येतिनवर्चंसूक्तं ८ कुत्सऋषिः द्राविणोदसगुणोग्निर्देवता। तत्शब्दात् रउद्गाग्निर्देवता विकल्पेन। अनादेशात्त्रिष्टुप्छंदः
सप्तत्पासहसाजायमानइतिजातवेदस्यमितिब्राह्मणस्त्त्रयोः। अप नोशोशुचदघमित्यष्टर्चंसूक्तं ८।
कुत्सऋषिः रउचये ग्निर्देवता। रउचइत्यग्नेर्गुणः। तत्शब्दाद्रउद्गाग्निर्देवता विकल्पेन। गायत्रीछंदः। अग्नयेरउचयेस्वाहेतिश्रुतिः। अप
नःशोशुचदघमितित्यत्त्वचंकृतेतिनिर्गृहे। वैश्वानरीयस्पत्त्वंवैश्वानरीयं। वैश्वानरस्यसुमतौस्यामेत्यष्टर्चंसूक्तं २ कुत्सऋषिः वैश्वानर
गुणोग्निर्देवता। अस्येतिवैश्वानरीयं। तत्शब्दाद्रउद्गाग्निर्देवताविकल्पेन। अग्नयेवैश्वानरायस्वाहेतिश्रुतिः। अनादेशात्त्रिष्टु
प्छंदः वैश्वानरस्यसुमतौस्यामेत्याग्निमारुतशस्त्रेब्राह्मणस्त्त्रयोः। जातवेदसएकाजातवेदस्यं। जातवेदसइत्येकर्चंसूक्तं १ मरी
चीपुत्रकश्यपऋषिः जातवेदासगुणोग्निर्देवता। अस्यातिजातवेदस्यं। जातवेदसइत्यग्नेर्गुणः। तत्शब्दाद्रउद्गाग्निर्देवताविकल्पे
न। अनादेशात्त्रिष्टुप्छंदः। जातवेदसेसुनवामसोममितिजातवेदस्यस्तुतेत्याग्निमारुतेशस्त्रेब्राह्मणस्त्त्रयोः। तत्रेतिहासः। ३४
इहाग्निपत्तंऋषिभिर्लोकेसूक्तानिभिरीडितः। जातवेदास्ततोजातोमध्येवैश्वानरोदिवीति। ऐतदादीन्येकभूयांसिसूक्तसहस्रमे

तत्तुकश्यपार्षं जातवेदसइत्यादिसहस्रसूक्तंभवति। एकर्चमार्धर्चपांतान्येतदादीन्येकभूयांसीत्यर्थः। एकैकर्चोबहुतराणीति। द्वंद्वंचंत्वृचं
पंचर्चमित्यादिगणना सूक्तसहस्रं कश्यपार्षं। अयंचकश्यपोमरीचिपुत्रः मरीचिः काश्यपइति भगवताशौनकाचार्येणाध्ययनपरिहारे
णेवतदुपदिष्टं। शौनकेनस्वयंप्रोक्तासर्वानुक्रमणिरित्थं। पूर्वात्पूर्वात्सहस्रस्यसूक्तानामेकभूयसां। जातवेदसइत्याद्याः कश्यपार्षस
रउक्रमइति। सयोवृषेत्येकोनावार्षागिराऋज्राश्वांबरीषसहदेवभयमानसुराधसः। सयोवृषेत्येकोनविंशत्यृचंसूक्तं १०॥ अनिरुक्ता
संख्येति। वृषागिरोमहाराजस्यापत्यभूताःपंच। ऋज्राश्वएकः। अंबरीषोद्वितीयः। सहदेवस्तृतीयः। भयमानश्चतुर्थः। सुराधसः पं
चमः इत्येतेपंचराजऋषयः। सहैवद्रष्टव्याः। अत्रैवसूक्ते। एतत्त्यत्तइंद्रवृष्णउक्थंवार्षागिराइत्यनयाऋचाऋषयोदितव्याः का
रिका। सूक्तंसयोवृषेत्येतत्पंचवार्षागिराविदुः। नियुक्तानामधेयैस्तैरषिचैतत्पदीत्यृचीति। अनादेशान्मरुत्वानिंद्रोदेवता॥
अनादेशात्त्रिष्टुप्छंदः। सयोवृषावृष्ण्येभिःसमोकाइतिसूक्तंब्राह्मणस्त्त्रयोः। प्रमंदिनएकादशकुत्सस्त्रैष्टुभंतमाया
गर्भस्त्रावविष्णुपनिषत्॥ प्रमंदिनइत्येकादशर्चंसूक्तं ११ पूर्ववत्कुत्सऋषिः पुनः कुत्सग्रहणं बाध्यबाधकार्थं। अनादेशादिंद्रो
देवतामरुद्गणयुक्तः। ततः प्रमंदिनइत्याद्यर्काग्गर्भस्त्राविणी। अस्याःअपात्गर्भास्त्रुरवंसंस्रवंतीत्यर्थः। उपनिषदित्येकार्योः

ततः यद्वामरुतः परमइत्यंत्या त्रस्त्रर्चस्त्रिष्टुभः ततः प्रमंदिनइत्याद्याः सप्तर्चो त्रिष्टुबंतस्येतिजागतं छंदः प्रमंदिनेपितुमदर्च्चताव चइतिसू
२५ क्तं ब्राह्मणस्त्रत्रयोः इमांतेत्या त्रिष्टुप् ॥ इमांतेधियमित्येकादशर्चं सूक्तं ११ पूर्ववदस्यसूक्तसंख्येति ॥ कुत्सऋषिः अनादेशात् इंद्रो देवता ॥ त्रिष्टुबंत
स्येतिजागतं छंदः विश्वाहेंद्रइत्यंत्यर्क त्रिष्टुप् ॥ इमांतेधियमितिसूक्तं स्वाध्यायधर्मः तत्त्वेष्टौ ॥ तन्नइंद्रियमित्यंत्यर्क्षौ षडर्चं सूक्तं ८ ॥ कुत्स
ऋषिः अनादेशात् इंद्रो देवता ॥ अनादेशात् त्रिष्टुप् छंदः तन्नइंद्रियं परमं पराचैरिति सूक्तमिति ब्राह्मणस्त्रत्रयोः योनिर्नव ॥ योनिष्टइंद्रनि
षदइति नवर्चं सूक्तं ९ ॥ कुत्सऋषिः अनादेशाद् इंद्रो देवता ॥ अनादेशात् त्रिष्टुप् छंदः ॥ योनिष्टइंद्रनिषदइति सूक्तं स्वाध्यायधर्मः चंद्र
माएकोना स्वस्त्रितोवा वैश्वदेवं हपाक्कं मंत्या त्रिष्टुबष्टा भीमहाबृहतीयवमध्या ॥ चंद्रमाएकोना अस्त्वित्येकोनविंशत्यर्चं सूक्तं १९ अ
निरुक्तासंख्येतिः सप्तेः पुनरत्रितऋषिः ॥ वाविशिष्टइतिवचनात् ॥ उत्तरत्रनानुवृत्तिः कारिका ॥ चंद्रमास्सूक्तमाद्यंच त्रितं शृदिवसाद्युप
मिति ॥ विकल्पेन कुत्सऋषिः ॥ विश्वेदेवा देवता ॥ हिशब्दात् त्रीणि सूक्तानि वैश्वदेवानि ॥ पंक्तिश्छंदः एनांरूपेणेत्यंत्यर्क त्रिष्टुप् ॥ ततः २५
संमात पंक्त्यष्टम्यक्रमहीष्टबृहतीयवमध्या त्रिष्टुप्भेदः मध्यमपादो द्वादशाक्षरश्चेति विशेषः आद्यंतौ द्वौ द्वौ पादौ वष्टकावि
तिचत्वारोष्टकाजागतश्चेति ॥ चंद्रमा अप्स्वंतरेति सूक्तं स्वाध्यायधर्मः ॥ इंद्रंमित्रं सप्त त्रिष्टुबंतं ॥ इंद्रंमित्रंवरुणमिति सप्तर्चं सूक्तं ७

कुत्सऋषिः ॥ हिशब्दात् विश्वेदेवदेवता ॥ त्रिष्टुबंतस्येतिजागतं छंदः देवैर्नोदित्यादितिरित्यंत्यर्क त्रिष्टुप् ॥ इंद्रंमित्रमितिसूक्तं स्वाध्यायध
र्मः ॥ ॥ यज्ञसूक्तं ॥ ॥ यज्ञोदेवानामितिलवर्चं सूक्तं ३ ॥ कुत्सऋषिः ॥ हिशब्दात् विश्वेदेवादेवता ॥ अनादेशात् त्रिष्टुप् छंदः ॥ यज्ञोदेवाना
मितिसूक्तं स्वाध्यायधर्मः ॥ ॥ यइंद्राग्नीसप्तोनैंद्राग्नंतु ॥ ॥ यइंद्राग्नीचित्रतममितित्रयोदशर्चं सूक्तं १३ अनिरुक्तासंख्येति ॥ कुत्स
ऋषिः इंद्राग्नीदेवते अस्येत्यैंद्राग्नं ॥ तुशब्दात् उत्तरसूक्तमैंद्राग्नं ॥ अनादेशात् त्रिष्टुप् छंदः ॥ यइंद्राग्नीसूक्तं स्वाध्यायधर्मः ॥ ॥
॥ विह्यवेषौ ॥ ॥ विह्यव्यमित्यष्टर्चं सूक्तं ८ ॥ कुत्सऋषिः ॥ तुशब्दात् इंद्राग्नीदेवता ॥ अनादेशात् त्रिष्टुप् छंदः ॥ विह्यव्यमितिसू
क्तं स्वाध्यायधर्मः ततंनवार्भवंतु ॥ पंचम्यंत्यत्रिष्टुभौ ॥ ततंमइतिनवर्चं सूक्तं ९ ॥ कुत्सऋषिः ऋभवोदेवता ॥ अस्येत्यार्भवं
तुशब्दात् उत्तरसूक्तमार्भवं ॥ त्रिष्टुबंतस्येतिजागतं छंदः क्षेत्रमिवपंचमक त्रिष्टुप् ॥ वाजेभिर्नइत्यंत्यर्क त्रिष्टुप् ॥ ततंमइतिसूक्तं वैश्वदे
वशस्त्रे सूत्रकारः ॥ ॥ तक्षन्पंचान्त्या त्रिष्टुप् ॥ तक्षन्रथमितिपंचर्चं सूक्तं ५ कुत्सऋषिः ॥ तुशब्दात् ऋभवोदेवता ॥ त्रिष्टुबंतस्येतिजागतं छं
दः ऋभुर्भरायेत्यंत्यर्क त्रिष्टुप् ॥ तक्षन्रथमितिसूक्तं वैश्वदेवशस्त्रे ब्राह्मणस्त्रत्रयोः ईळेपंचाधिकाश्विनमाद्योपादो लिंगोक्तदेवता ॥

 वंत्येत्रिष्टुभौ॥ ॥ईळे द्यावापृथिवीइतिपंचविंशत्यृचंसूक्तं॥२९॥जानिरुक्तासंख्येति॥कुत्सऋषिः अश्विनौदेवता॥त्रिष्टुबंतस्येति जागतंछंदः॥
 ततः ईळे द्यावापृथिवीइत्याद्यर्क आद्योद्वौपादौलिंगोक्तदेवतौ॥प्रथमाद्यावापृथिवी॥द्वितीयाआग्नेयी॥भरस्वतीमित्याद्यंते द्वे ऋचौ त्रिष्टुभौ
ईळे द्यावापृथिवीइतिसूक्तं प्रवर्ग्येतथा प्रातरनुवाकानुमंत्रणेब्राह्मणसूत्रयोः॥ ॥इतिश्रीमदृग्वेदानुक्रमणिदीपिकायांडाखलो
पनामकमहदेवकृतगणेशाकृतौप्रथमाष्टकस्यसप्तमोध्यायः॥ ॥इदंविंशतिरूपस्यं द्वितीयोर्धर्चोरात्र्यैर्वा॥इदंश्रेष्ठमितिविंश
त्यृचंसूक्तं॥२०॥कुत्सऋषिःउषादेवता॥अस्येत्कपरस्यं॥अनादेशात्त्रिष्टुप्छंदः॥यथाप्रसवेतिद्वितीयोर्धर्चोरात्रिदेवतोविचकारा
त्॥इदंश्रेष्ठमितिसूक्तं प्रातरनुवाकानुमंत्रणेसूत्रकारः॥इमाएकादशरौद्रं द्वित्रिष्टुबंतं॥इमारुद्रायेत्येकादशर्चंसूक्तं ११ कुत्सऋ
षिः रुद्रोदेवता॥अस्यतिरौद्रं॥त्रिष्टुबंतस्येतिजागतंछंदः॥आरेतेगोघ्नमित्याद्यंत्ये द्वे ऋचौ त्रिष्टुभौ॥चतस्रोदिशउपतिष्ठेत॥
मारुद्राय तरसइतिगृह्ये॥चित्रंषट्सौर्यं॥चित्रंदेवानामितिषळृचंसूक्तं ६ कुत्सऋषिः॥सूर्योदेवता॥अनादेशात्त्रिष्टुप्छंदः॥
चित्रंदेवानामुदगादनीकमितित्रैष्टुभमित्याश्विनसहस्रशस्त्रेब्राह्मणसूत्रयोः॥नासत्याभ्यांपंचाधिका कक्षीवान्दैर्घतमसऔशि

कृ॥सतआश्विनंदे॥नासत्याभ्यामितिपंचविंशत्यृचंसूक्तं॥२५॥अनिरुक्तासंख्येति॥दैर्घतमसपुत्रः कक्षीवानृषिः॥आपरुच्छेपात्ए
कादशसूक्तानिकक्षीवानृषिरपश्यत्॥अग्निंहोतारंसूक्तमित्यतःप्राक्॥अश्विनौदेवता॥दैशब्दात्पंचसूक्तान्यश्विनौदेवत्यानि॥अनादे
शात्त्रिष्टुप्छंदः॥नासत्याभ्यांबर्हिरिवेतिसूक्तं प्रातरनुवाकानुमंत्रणेसूत्रकारः॥अत्रेतिहासः॥अंगराजस्यमहिषीधर्मपत्नीतस्यादा
सीउशिक्नाम्नीपुरागंगायामंगराजोयुवतिभिःसहजलेक्रीडन्प्रद्वेषिण्याभार्ययाउच्चैर्दासीश्वपुत्रवृद्धेगंगायांमध्येप्रक्षिप्तःसर्वतोदीर्घत
माआजगाम॥तंदृष्ट्वांगराजोपिवंधाउत्पन्नस्यसंतानंचास्मैकल्पयित्वा॥हेभगवन्अपुत्रस्यममज्येष्ठमाहिष्यांपुत्रोत्पत्तिंकुर्वितयचने॥सचतथे
तिप्रपेदे॥अथराजापिमहिषीमुवाच॥ऋषिर्गलितिसचायमपिवृद्धोअतिदुर्गंधतरगंधश्चातरइतिमत्वाराजस्त्रीभार्याअस्मैस्वदासीप्राहि
णोत्॥सचांगमहिष्याप्रेषिता॥सदासर्वज्ञेनदीर्घतमसादासीतिज्ञात्वातेनमंत्रपूतेनजलेनाभ्युक्षितामहातेजःस्विनीऋषिप्रत्यासत्॥सतस्यां
 कक्षीवंतमुत्पादयामास॥एवंचार्थंसमाम्नायते॥कक्षीवंतंयओशिजइतिमंत्रदर्शनात्॥उशिजओशिजःपुत्रउशिग्वंशेःकांतिकर्मणइतियास्क
वचनात्॥मध्वः॥मध्वःसोमस्येतिपंचविंशत्यृचंसूक्तं २९ सूक्तसंख्येति॥कक्षीवानृषिः॥दैशब्दात्॥अश्विनौदेवता॥अनादेशात्त्रिष्टुप्छंदः
मध्वःसोमस्येतिसूक्तंस्वाध्यायधर्मः॥ ॥आवामेकादश॥ ॥आवांरथोअश्विनेत्येकादशर्चंसूक्तं॥११॥कक्षीवानृषिः॥अश्वि

स॰ नु॰ दी नौदेवता।अ॰छंदस्त्रिष्टुप्त्वः।आवांरथोअश्विनेतिसूक्तंस्वाध्यायध्यायधर्मः॥आवमेकादश॥आवांरथोअश्विनेत्येकादशर्चंसूक्तं११॥कक्षी॰षिः
२८ वै॰अश्वि॰जगतीछंदः॥आवांरथामितसूक्तंप्रातरनुवाकानुमंत्रणेसूत्रकारः॥काराधद्वादशांत्याद्दुःस्वप्ननाशिन्याद्यागायत्री॥द्वितीयाककुप्तृ
तीयाचतुर्थ्योर्विराट्अष्टम्योःपंचमीतनुशिराषष्ठ्यस्तैरेतछिम्निष्टारबृहतीकृतिर्धिराड्विंशेगायत्र्यः॥काराधद्वोत्रेनिद्वादशर्चसूक्तं१२कक्षी
ऋषिः।अश्वि॰।अधस्वप्नस्येत्यंत्यर्कः।दुःस्वप्ननाशिनी।तज्जपाचअरिष्टनाशनमित्यर्थः॥ततःयथाक्रमेणछंदांस्युच्यंते।काराधादित्याद्य
र्कः।गायत्री।विद्वांसावितिद्वितीयर्कक्ककुबुष्णिक्।नाविद्वांसेतितृतीयर्कः।कांविराडनुष्टु॰द्विपृष्ठामीतिचतुर्थी।ऋक्लष्टपानुष्टु॰प्रयाघो
षइतिपंचमऋक्तनुशिरोष्णिक्।श्रुतंगायत्रमितिषष्ठीऋक्।अक्षरेणोष्णिक्।नपादानियमः॥युवंश्चास्तमितिसप्तम्यक्विष्टारबृहती।अ
श्विनोर्मध्वेदशकाविति।याकस्माइत्यष्टम्यक्कृतिरनुष्टुप्।इहीयन्निति नवम्यृक्॰एकादशाक्षराढनुष्टुप्॥अश्विनोरसनंरसमित्याद्यं
त्याप्तिस्रोगायत्र्यः।काराधध्यो॰तस्त्वमिति ब्राह्मणश्रुतिः॥कादश्यापंचोनावैश्वदेवंवा।कक्षिकान्हादिपंचदशर्चंसूक्तं१५अ॰न्वेति॰कक्षीवा
नूअना॰इंद्रादे॰विकल्पेनविश्वेदेवादेवतेति॰विश्वेदेवाःसर्वेदेवाइतिश्रुतिः॥अनादे॰त्रि॰छंदः॥कदित्थान्द्दनितिसूक्तंस्वाध्यायधर्मः॥ ॥ सप्तकोटीश
॥ ॥इतिश्रीमदृग्वेदानुक्रमणिदीपिकायांडोरवलोपनामकक्षत्रसदस्कृतगणेशकृतौप्रथमाष्टकस्याष्टमोध्यायः॥ ॥श्रीः २८

[illegible]

Title	Ātmabodha.
Author	S'amkara.
Editor	
Year, Vols.	
Publisher	
Remarks	

392 B.

आत्म० श्रीगणेशाय नमः॥ ॥ शतमखपूजितपादं शतपथमनसोप्यगोचराकारं॥ विकसितकमलरुरु
१ नेत्रमुमाछायाकमाश्रये शंभुं॥१॥ इह भगवान् शंकराचार्य उत्तमाधिकारिणं वेदांतप्रस्थानत्र
यं निर्माय तदवलोकनासमर्थानां मंदबुद्धीनामनुग्रहार्थं सर्ववेदांतसिद्धांतसंग्रहमात्मबोधा
ख्यं प्रकरणं निदर्शयिषुः प्रतिजानीते॥ ॥ तपोभिः क्षीणपापानां शांतानां वीतरागिणां। मु
मुक्षूणामपेक्ष्योयमात्मबोधो विधीयते॥१॥ कृच्छ्रचांद्रायणनित्यनैमित्तिकाद्यनुष्ठानरूपैस्त
पोभिः क्षीणानि पापानि रागाद्यंतःकरणदोषा येषां। नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयमि
ति वचनात्। अत एव शांतानां असोमिताशयानां वीतरागिणां इहामुत्रार्थफलभोगविर
क्तानां मुमुक्षूणां संसारग्रंथिभेदने कृत[illegible]यत्नानां यथोक्तसाधनसंपन्नानां अयमात्म
बोधो विधीयते। विधिमुखेनावश्यकर्तव्यतया प्रतिपाद्यत इत्यर्थः॥१॥ ननु तपोयोगमंत्र
।१। यागाद्यनेकसाधनेषु सत्सु मोक्षं प्रति बोध एव किमिति प्राधान्येनोच्यत इत्यत्राह॥ १
बोधोन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनं॥ पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्य

कर्म ति॥१॥ तपोमंत्रयोगादिसाधनानि परंपरया क्रमेण ज्ञानद्वारेण मोक्षं साधयंति। ज्ञानं तु स्वजन्मना
त्रादेवाज्ञानं निःशेषं नाशयित्वा मुमुक्षुं स्वाराज्येभिषेचयति॥ अतोन्यसाधनेभ्यो ज्ञानस्य
प्राधान्यमुक्तं तदेव दृष्टांतेन दृढयति। पाकस्येति। यथा लोके पचनक्रियायाः काष्ठजलभांडा के
पु दिसाधनेषु सत्स्वपि वह्निं विना पाको न सिध्यति। तद्वज्ज्ञानं विना मोक्षो न सिध्यतीत्यर्थः॥२॥
ननु कर्मणां विचित्रशक्तिमत्वात्कर्मैव किं विदज्ञानं नाशयिष्यति किमात्मज्ञानेनेत्याशंक्य कर्मा
ज्ञानयोर्विरोधाभावात् नैवमित्याह॥ अविरोधितया कर्म नाविद्यां विनिवर्तयेत्॥ विद्या
विद्यां निहंत्येव तेजस्तिमिरसंघवत्॥३॥ कर्मणोऽविद्याविरोधाभावादज्ञानं नाशयितुं
नोत्सहते। विद्यायाः प्रकाशरूपत्वात्। अंधं तमस्तेजःपुंज इव नाशयितुं समर्थेत्यर्थः। न ६
नु प्रतिशरीरमात्मा परिच्छिन्न एवोपलभ्यते कथमस्य कैवल्यमित्यत्राह॥ परिच्छिन्न इवा
ज्ञानात्तन्नाशे सति केवलः॥ स्वयं प्रकाशते ह्यात्मा मेघापायेंशुमानिव॥४॥ परिपूर्णस्या
द्वितीयस्यात्मनः अज्ञानपरिकल्पितत्वान्नवशरीराध्यासकृतपरिच्छिन्नत्वमविवेकेन

तमेघेन नवुतत्वदृष्ट्या अबोधविवेकेन अविवेकाहानादात्माकेवलएव प्रकाशतेमेघावरणाभा
वेभानुवदित्यर्थः॥ नन्वात्मनोद्वैतसिद्धिरयुक्तावृत्तिज्ञानेनद्वैतसिद्धेरित्यत्राह॥ ॥अज्ञा
नकलुषंजीवंज्ञानाभ्यासाद्विनिर्मलं॥ कृत्वाज्ञानंस्वयंनश्येज्जलंकतकरेणुवत्॥ ५॥ अ
ज्ञानकार्यभूतैरहमादिभिःकलुषीकृतंकर्तृत्वभोक्तृत्वाद्यभिमानिनंजीवंज्ञानंकर्तृचिर
कालाभ्यासादज्ञानहननद्वारातत्कार्यांतःकरणादिकंनिःशेषंनाशयित्वास्वयमेवनश्य
ति।अज्ञानकार्यत्वाद्वृत्तेस्तत्रप्रतिबिंबितब्रह्मात्माभासत्वात्।आत्मन्येवैकीभवतित
दानीमद्वयएवात्माप्रकाशतेयथाकतकरेणुराविलंजलंनिर्मलंकृत्वास्वयमेवनश्य
तीतद्वदित्यर्थः॥ ५॥ ननुअपरोक्षतयानुभूयमानस्यसंसारस्यकथमत्यंतासत्वप्र
त्यक्षविरुद्धमित्याशंक्यस्वप्नदृष्टांतेनास्यमिथ्यात्वंसाधयति॥ ॥संसारःस्वप्नतु
ल्योहिरागद्वेषादिसंकुलः॥स्वकालेसत्यवद्भातिप्रबोधेसत्यसद्भवेत्॥ ६॥ संसा २
रइति।रागद्वेषादिभिःसंकुलायमानःसंसारःस्वकालेस्वस्यकारणभूताज्ञानस्थितेस

तितावन्मिथ्याभूतोपिसंसारःसंसारःसत्यवद्भातिप्रतिबोधेसतिवाक्यश्रवणादात्मज्ञानोत्पत्तौ
असन्निवभवतितत्रदृष्टांतःस्वप्नतुल्यइति॥ स्वप्नोहियावन्निद्रानुभूयतेतावन्मिथ्याभूतो
पिस्वप्नःसत्यइवभाति।प्रबोधेनिद्रानाशेमिथ्यातद्वदित्यर्थः॥६॥ जगन्मिथ्यात्वमेव
दृष्टांतांतरेणदृढयति॥ ॥तावत्सत्यंजगद्भातिशुक्तिकारजतंयथा।यावन्नज्ञायतेब्रह्म
सर्वाधिष्ठानमद्वयं॥ ७॥यथायावन्नीलपृष्ठत्रिकोणादिविशेषज्ञानंनोत्पद्यतेता
वद्रजतज्ञानंसत्यमेवानुभूयतेतथासर्वाधिष्ठानभूतंसच्चिदानंदाद्वयंब्रह्मयावन्नज्ञा
यतेसाक्षान्नानुभूयतेतावज्जगदाकारेणपरिणतःसंसारःसत्यइवभ्रांत्यादृश्यतइत्य
र्थः॥७॥ सर्वंदृश्यंप्रपंचजातंब्रह्मण्येवमायाकल्पितमितिप्रतिपादयति॥ ॥सच्चि
दात्मन्यनुस्यूतेनित्येविष्णौप्रकल्पिताः॥ व्यक्तयोविविधाःसर्वाहाटकेकटकादिवत्
॥८॥सत्यज्ञानानंदात्मनिनित्येसर्वानुस्यूतेविष्णौव्यापकेब्रह्मणिसर्वाव्यक्तयदेव

आत्म० तिर्यङ्नरस्थावरजंगमादयोविविधाअपिव्यक्तयःसर्वोपादानभूतेपरमेश्वरेहेम्निकटकमुकु
३ टादयइवकल्पिताएवब्रह्मणःअभिन्नाइत्यर्थः॥८॥उक्तमर्थमाकाशदृष्टांतेनद्रढयति॥
॥यथाकाशोहृषीकेशोनानोपाधिगतोविभुः॥तद्भेदाद्भिन्नवद्भातितन्नाशेकेवलोभवेत्॥
॥९॥हृषीकेशःमनःप्रभृतिसर्वेंद्रियप्रवर्तकःनियामकोवाविभुःसर्वगतःपरमेश्वरःस्व
माययापरिकल्पितनानाविधोपाधिषुप्रतिबिंबितःसन्नानेवभातितन्नाशेसतिब्र
ह्मात्मैक्यज्ञानेनतेषांमायापरिकल्पितदेहाद्युपाधीनांनाशेसतिकेवलएकवद्भातियथा
एकएवाकाशोमठघटाद्युपाधिषुएकएवनानाविधोभवतिउपाधिविलयेएकवद्भा
तितद्वदित्यर्थः॥९॥ननुसर्वदेहेषुतत्तज्जात्यादिभिरनुविद्धस्यकथंनित्यमुक्त ३
ताउच्यतेतत्राह॥ ॥नानोपाधिवशादेवजातिवर्णाश्रमादयः॥आत्मन्यारोपिता
स्तोयेरसवर्णादिभेदवत्॥१०॥पूर्वोक्तेनानोपाधिवशादेवात्मनिजातिवर्णाश्रमादयः

आरोपितामायापरिकल्पिताःनतुस्वतः।यथास्वभावमाधुर्यंजलंकटुतिक्तमधुराम्लरक्त
पीतादिद्रव्योपेतंसत्तत्तद्रूपंभवतिनतुस्वरूपेणतद्वदित्यर्थः॥१०॥आत्मनोविद्यापरिक
ल्पितोपाधित्रयमध्येस्थूलोपाधिमाह॥ ॥पंचीकृतमहाभूतसंभवंकर्मसंचितं॥शरी
रंसुखदुःखानांभोगायतनमुच्यते॥११॥पंचानांभूतानांप्रत्येकंद्विधाविभज्यतत्रैक
मेकैकमर्द्धंचतुर्द्धाविभज्यस्वांशंपरित्यज्यतेषुयोजनंपंचीकरणं।एवंपंचीकृतेभ्यःस्थू
लपृथिव्यादिभूतेभ्यःसंभवोयस्यतत्संभूतंप्रारब्धकर्मभिःसंचितंरचितंस्थूलशरी
रंसुखदुःखानामायतनंभोगस्थानंप्रत्यगात्मनइति॥११॥सूक्ष्मोपाधिमाह।पंचप्रा
णमनोबुद्धिदशेंद्रियसमन्वितं।अपंचीकृतभूतोत्थंसूक्ष्मांगंभोगसाधनं॥१२॥ ॥
पंचप्राणाःएकस्यैवमहाप्राणस्यप्राणादयोवृत्तयः।ज्ञानेंद्रियकर्मेंद्रियभेदेनइंद्रियाणि
दशमनःशब्देनसंकल्पविकल्पात्मिकांतःकरणवृत्तिःबुद्धिर्निश्चयात्मिकाएतैःसंयुक्तं।

आत्म॰ अपंचीकृतभूतोत्थं सूक्ष्ममभूतोत्थं जातं सूक्ष्मांगं लिंगशरीरं सुखदुःखभोगसाधनमित्यर्थः।
तृतीयं कारणोपाधिमाह॥ ॥अनाद्यविद्यानिर्वाच्या कारणोपाधिरुच्यते। उपाधित्रितया
४ दन्यमात्मानमवधारयेत्॥१२॥ सदसद्भ्यामनिर्वाच्या अविद्या अनादिभूता कारणोपाधिरुच्य
ते। सा समष्टिव्यष्टिभेदेन स्थूलसूक्ष्मप्रपंचयोः कारणभूतत्वात्कारणोपाधिरुच्यते। उपा
धित्रितयकथने कारणमाह। उपाधित्रितयादन्यमिति। तत्साक्षिणमात्मानमवधारये
त्। जानीयादित्यर्थः॥१३॥ ननु अन्नमयाद्येषु कोशेषु व्याप्य तत्तन्मयतया स्थितस्य
कुतो नित्यत्वमुच्यते इत्याशंक्याह। पंचकोशादियोगेन तत्तन्मय इव स्थितः। शुद्धात्मा
नीलवस्त्रादियोगेन स्फटिको यथा॥१४॥ ॥अन्नमयप्राणमयमनोमयविज्ञानम
यानंदमयाः पंचकोशाः आदिशब्देन पिपासादीनां ग्रहणं एतैर्योगेन मिथ्यातादात्म्येन तत्तन्म ४.
य इव स्थितः। आत्मा शुद्धः ननु तेषु वस्तुतो रंजितः वेदोपि स वा एष पुरुषोन्नरसमय इ
गे

त्यादिभिः सूक्ष्मवस्तुदर्शनार्थमेवोपाधिस्थं ब्रह्म सूचयति न तु तत्त्वदृष्ट्या यथा निर्मलस्फटिको
नीलपीतवस्त्रादियोगेन तत्तन्मय इवाभाति। वस्तुतो नास्ति तेन रंजनं तद्वदित्यर्थः॥१४॥
असंगात्मस्वरूपज्ञानविवेचनप्रकारमाह॥ वपुस्तुषादिभिः कोशैर्युक्तं युक्त्यावघाततः॥
आत्मानमंतरं शुद्धं विविच्यात्तंदुलं यथा॥१५॥ पंचकोशैस्तावदात्मनि स्थितेः वपुः स्थूल
शरीरं तुषादिभिर्युक्तं तंदुलमिव युक्तं युक्त्याऽवघाततः अवहननात् शुद्धमात्मानं तंदु
लमिव विविच्यात् विवेकेन जानीयात्॥ कथमयं स्थूलदेहो नात्मा भूतकार्यत्वाद्घटवत्॥ त
सूक्ष्मदेहोपि तथैव नात्मा देहत्वात्। स्थूलदेहवदित्यनुमानादीनां तेभ्यः कोशेभ्यो भि
तमा न्नमात्मानं विविच्य जानीयादित्यर्थः॥१५॥ नन्वात्मा सर्वगतस्तर्हि किं सर्वत्र सर्वैर्न दृश्य
त इत्यत आह॥ सदा सर्वगतोप्यात्मा न सर्वत्रावभासते। बुद्धावेवावभासेत स्वच्छेषु प्रतिबि
बवत्॥१६॥ आत्मा सर्वगतोपि सर्वत्र व्याप्य स्थितो जडैः बहिःप्रवृत्तासैर्न प्रकाश्यते

आत्म० रागादिभिरविद्यायां बुद्धावेवावभासते। न सर्वत्र यथा प्रतिबिंबः स्वच्छेष्वेव दर्पणादिषु दृश्य
५ ते नान्यत्र तद्वदित्यर्थः॥१६॥ देहेष्वस्थितस्यात्मनो औदासिन्यं राजपुरुषदृष्टांतेनाह॥
॥ देहेंद्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणं॥ तद्वृत्तिसाक्षिणं विंद्यादात्मानं राजवत्सदा॥
॥१७॥ देहेंद्रियमनोबुद्धिप्रकृतिभ्यो जडपरिणामेभ्यो दृश्येभ्यो विलक्षणं शुद्धमात्मानं त
द्वृत्तीनां साक्षितया स्थितं यथा राजा स्वनगरे स्थितेषु मंत्रिषु वर्तमानेषु स्वयं साक्षित
या तान् पश्यन् तिष्ठति तद्वदित्यर्थः॥१७॥ नन्वात्मनो विकारित्वमयुक्तं सर्वदा व्यापारवा
न् दृश्यते तत्राह॥ ॥व्यापृतेष्विंद्रियेष्वात्मा व्यापारीवाविवेकिनां। दृश्यतेभ्रेषु धाव
त्सु धावन्निव यथा शशी॥१८॥ इंद्रियादिषु स्वस्वविषयेषु व्यापृतेषु सत्सु आत्मा व्यापा
रीवाविवेकिनां गुरुशास्त्राद्युपदेशरहितानां दृश्यते न तु तत्वदर्शी यथा मेघखंडेषु वायुव ५
शाद्धावत्सु चंद्रोपि धावतीव लोकैर्दृश्यते न तु चंद्रमा धावति तथात्मापीत्यर्थः॥१८॥

यो।

ननु देहेंद्रियमनोबुद्धयोपि स्वचेतना दृश्यंते किमात्मचैतन्येन तत्राह॥ आत्मचैतन्यमाश्रित्य दे
हेंद्रियमनोधियः॥ स्वकीयार्थेषु वर्तंते सूर्यालोकं यथा जनाः॥१९॥ नित्यज्ञानस्वरूपचैतन्य
माश्रित्य देहेंद्रियमनोबुध्यादयः स्वकीयार्थेषु स्वस्वविषयेषु वर्तंते। यथा जनाः प्राणिनः सू
र्यालोकं सूर्यप्रकाशमाश्रित्य स्वव्यापारेषु वर्तंते व्यवहरंति। अतश्चेतनज्ञानमात्मन एव
मात्मन्येव देहेंद्रियादयस्तु जडा एवेत्यर्थः॥१९॥ नन्वहं जातोस्मि बाल्यकौमाराद्यवस्था
मनुभवामि पश्यामीत्याद्यनवरतमनुभूयमानस्यात्मनः कथमविकारित्वमुच्यत इत्य
त्राह॥ देहेंद्रियगुणान्कर्माण्यमले सच्चिदात्मनि॥ अध्यस्यंतेऽविवेकेन गगने नीलत्वा
दिवत्॥२०॥ देहेंद्रियमनोबुद्धिधर्मांश्च सत्वादीन्कर्माणि च कर्मेंद्रियव्यापारान्मिथ्या
तादात्म्येन स्थिते निर्मले संगरूपे सच्चिदानंदात्मके परमात्मन्येतत्सामीप्यादविवेकतोऽ
ध्यस्यंति। यथा गगने नीलतादिवत्। अतस्ते आत्मधर्मा न भवंति अपि तु देहादीनामेवेत्य
र्थः॥२०॥ ननु कर्तृत्वभोक्तृत्वादिकं आत्मन्यनवरतमनुभूयमानता दुर्वारमित्याशंक्य

तदपितथैवमिथ्येत्याह॥ अज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि। कल्प्यंतेंबुगतं
चंचलनादि यथांभसः॥ २१॥ अज्ञानान्मानसोपाधिरहंकारस्तस्यैव कर्तृत्वादयो धर्मा अ
ज्ञानवशादात्मनि कल्प्यंते यथांभसश्चलनादिकं अंबुनि प्रतिफलिते चंद्रमसि अविवेक
तः कल्प्यंते तद्वदात्मनीत्यर्थः॥ २१॥ रागेच्छासुखदुःखादीनामात्मधर्मान्मन्यं तेनैशेषिकाद यो
यस्तान्निराकरोति॥ रागेच्छासुखदुःखादिबुद्धौ सत्यां प्रवर्तते॥ सुषुप्तौ नास्ति तन्नाशे
तस्माद्बुद्धेस्तु नात्मनः॥ २२॥ रागेच्छासुखदुःखप्रयत्नादिकं सर्वं बुद्धेरेव न त्वात्मनः कु
यं जाग्रत्स्वप्नयोर्बुद्धौ सत्यां प्रवर्तते। सुषुप्तौ तस्याः बुद्धेर्नाशे कारणे लीने न प्रवर्त
ते तस्माद्बुद्धेरेव धर्मः नात्मन इति॥ तर्हि आत्मा कीदृक्स्वभाव इत्याशंक्य आत्मस्वभा
वं उपदिशति॥ प्रकाशोर्कस्य तोयस्य शैत्यमग्नेर्यथोष्णता। स्वभावः सच्चिदानंदनि
त्यनिर्मलतात्मनः॥ २३॥ यथा प्रकाश एवार्कस्य स्वभावस्तोयस्य शैत्यमग्नेरुष्णता त
थात्मनो सच्चिदानंदनित्यनिर्मलस्वभावः स्वरूपमित्यर्थः॥ २३॥ ननु यद्यकरण आत्मा त ६

र्हि जानामीति प्रत्ययः कस्येत्यपेक्षायामाह॥ आत्मनः सच्चिदंशश्च बुद्धेर्वृत्तिरिति द्वयं॥
संयोज्य चाविवेकेन जानामीति प्रवर्तते॥ २४॥ प्रत्यगात्मनः सच्चिदंशश्च अंश इवांशः
आत्माभासः। बुद्धेर्वृत्तिश्च एतद्द्वयमविवेकेन संयोज्यासंगस्यात्मनः केनापि संयोगो नास्त्ये
व तथाप्यज्ञानवशान्मेलनं संभाव्य जानामीति प्रत्ययः अहंकारवृत्तिः प्रवर्तते तत्के
वलप्रत्यगात्मनि न किंचिद्विकारोस्तीति भावः॥ २४॥ एतदेव स्पष्टयति। आत्मनो वि
या क्रिया नास्ति बुद्धेर्बोधो न जात्विति। जीवः सर्वमलं ज्ञात्वा ज्ञाता द्रष्टेति मुह्यति॥ २५॥ आ
त्मा स्वभावाद्दवविकारश्शून्यो बुद्धेः कदाचिदपि बोधशंकैव नास्ति तथापि जीवः साभासा
हंकारः सर्वं साभासांतःकरणवृत्तीनां एकत्वात्तायःपिंडवदेकत्व संगतमेवमलमत्यर्थं
ज्ञात्वा देहेंद्रियादिकं ममेति विचार्य अहंकर्ता हं द्रष्टेति मुह्यति भ्रांतो भवतीत्यर्थः।
॥ २५॥ आत्मानं स्वयमेव स्वस्मिन्न विवेकेनान्यधर्मानारोप्य बिभेतीत्याह। रज्जुसर्पवद
॥ २५॥ आत्मानं जीवं मत्वा भयं वहेत्। नाहं जीवः परात्मेति ज्ञातश्चेन्निर्भयो भवेत्॥ २६॥ य

आत्म०
७

थांधकारादौ विकारग्रहीतरज्वादौ सर्पाद्यारोपणं कृत्वा भयकंपादिकं वहेत् । एवमात्मा
प्यस्वस्मिन् जीवत्वमारोप्य सद्वितीयं परिच्छिन्नं ज्ञात्वा भयदुःखसागरे मग्नो भवति । यदा
शास्त्राचार्यप्रसादेन शास्त्रार्थज्ञानमुत्पन्नं भवति तदा विवेकेन चक्षुषा स्वात्मानमखं
डानंदज्ञानैकरूपं संपश्यन् ततो नाहं जीवः परमात्माहमिति ज्ञात्वा भयदुःखादिर
हितः सुखी भवेत् ॥२६॥ नन्वात्यंतसामीप्ये बुद्धिमनोहंकारादिभिः कथं नावलोक्य
ते न ज्ञायते तत्राह ॥ आत्मावभासयत्येको बुध्यादीनींद्रियाणि हि ॥ दीपो घटादि
वत्स्वात्मा जडैस्तैर्नावभास्यते ॥२७॥ आत्मा केवल एक एव सन्नपि बुद्धिमनोहंकारा
दीनवभासयति । तैर्जडैर्मन आदिभिर्नावभास्यते । यथा एक एव दीपो घटादीन्ब
हूनपि प्रकाशयति प्रकाशितैर्घटादिभिर्नावभास्यते तद्वदित्यर्थः ॥२७॥ आत्मा बु
ध्यहंकारादिभिर्नावभास्यते यदि तर्ह्यात्मज्ञाने ज्ञानांतरेण भवितव्यमित्याशंक्य नेत्या ७
ह ॥ स्वबोधे नान्यबोधेच्छा बोधरूपतयात्मनः ॥ न दीपस्यान्यदीपेच्छा यथा स्वात्मप्र

मि

काशने ॥२८॥ आत्मनो बोधस्वरूपत्वात्स्वबोधे नित्ये सति तस्यात्मनो बोधाय ज्ञानांतरापे
क्षा नास्त्येव अनुभवरूपत्वात् यथा दीपस्य स्वप्रकाशने दीपांतरापेक्षा नास्ति तद्वदित्यर्थः
॥२८॥ यदि बुध्यादिभिरात्मा ज्ञेयो न भवेत्तर्हि आत्मज्ञाने उपायांतरं वक्तव्यं । स उपायः कार्य
इत्याह ॥ निषिध्य निखिलोपाधीन्नेति नेतीति वाक्यतः ॥ विंद्यादैक्यं महावाक्यैर्जी
वात्मपरमात्मनोः ॥२९॥ अथात आदेशो नेति नेत्येतस्मिन्निरसनं वेदवाक्ये लक्षण
या ब्रह्मात्मैक्यज्ञानं विंद्यात्प्राप्नुयात् अनेन प्रकारेण ज्ञातव्यमित्यर्थः ॥२९॥ आत्म
स्वरूपज्ञाने अतन्निरसनाभावे कानः क्षतिरित्याशंक्य अतन्निरसनाभावे नात्मज्ञात
व्यइत्याशयवानाह ॥ आविद्यकं शरीरादि दृश्यं बुद्बुदवत्क्षरं । एतद्विलक्षणं विंद्यादहं
ब्रह्मेति निर्मलं ॥३०॥ देहेंद्रियादि सर्वं दृश्यजातं आविद्यकं दृश्यत्वात् । बुद्बुदवत्क्षरं न
श्वरं एतद्विलक्षणं निर्मलं निरुपाधिकं नित्यमेकं सच्चिदात्मकं ब्रह्मैवाहमस्मीति विंद्या

त्वततः कृतकृत्योभवेत्यर्थः ॥ ३० ॥ एवमुक्तरीत्यात्मानमद्वयानंदं वाक्यार्थज्ञानेनापरोक्षत
याज्ञात्वास्वानुभवावष्टंभेनात्मन्येवात्मनोमननप्रकारमाह ॥ ॥ देहान्यत्वान्नमेजन्म
जराकार्श्यलयादयः । शब्दादिविषयैः संगोनिरिंद्रियतयानच ॥ ३१ ॥ पंचभिःश्लोकैर्देहोऽ
नित्यत्वादिभिर्जडदृश्यत्वादिस्वभावः । स्थूलशरीरादन्यत्वान्मेजन्मजराकार्श्यलयाद
योनसंति इंद्रियादिभिरसंगत्वाच्छब्दादिविषयभोगैः संगोनुभवोनास्त्येव ॥ ३१ ॥ अ
मनस्त्वान्नमेदुःखरागद्वेषभयादयः ॥ अप्राणोह्यमनाशुभ्रोह्यक्षरात्परतः परः ॥ ३२ ॥
इत्यादिश्रुतिशासनात् ॥ ३२ ॥ एतस्माज्जायतेप्राणोमनः सर्वेंद्रियाणिच । खंवायु
र्ज्योतिरापश्चपृथ्वीविश्वस्यधारिणी ॥ ३३ ॥ कथमिंद्रियप्राणमनसांभासकत्वानेस्या
शंक्यश्रुतिःप्रमाणयतिस्पष्टार्थः ॥ ३३ ॥ निर्गुणोनिष्क्रियोनित्योनिर्विकल्पोनिरं
जनः । निर्विकारोनिराकारोनित्यमुक्तोस्मिनिर्मलः ॥ ३४ ॥ गुरुप्रसादात्स्वानुभव

सिध्यर्थंवाभिनयति । निर्गुणइत्यादिभिःश्लोकैः अहंनिर्गुणः बुद्ध्याद्यभावान्निष्क्रियः
इंद्रियाद्यभावान्नित्योपक्षयाभावान्निर्विकल्पः संकल्पविकल्पाभावान्निरंजनः असंग
त्वान्निर्विकारः षोडशकलात्मकलिंगदेहशून्यत्वान्निराकारः निरवयवत्वान्नित्यमु
क्तः बंधाभावान्निर्मलः अविद्यातत्कार्यरहितत्वात् ॥ ३४ ॥ ननुपूर्वोक्तैर्हेतुभिरेवंवि
शिष्टंस्वरूपमज्ञाद्विषमित्युक्तंतत्किंविशिष्टमित्याशंक्याह ॥ ॥ अहमाकाशवत्सर्वंब
हिरंतरगोच्युतः । सदासर्वसमः शुद्धोनिःसंगोनिर्मलोचलः ॥ ३५ ॥ आकाशवत्सर्वस्य
दृश्यजातस्यबहिरंतर्गतः अच्युतः च्युतिरहितः सदासर्वसमः विषमेषुसमः व्याप्य
स्थितस्तथाविशुद्धः निर्लेपः अचलः पूर्णस्यचलनाभावात् ॥ ३५ ॥ नित्यशुद्धविमुक्तैक
मखंडानंदमद्वयं ॥ सत्यंज्ञानंअनंतंयत्परंब्रह्माहमेवतत् ॥ ३६ ॥ एकमखंडानंदमद्वि
तीयमौवादद्वयंसत्यंज्ञानंतंयत्परंब्रह्मेतिश्रुत्याप्रतिपाद्यतेयत्परंब्रह्मैवाहमस्मीति
अनं

आत्म० स्वरूपतत्वंकथितं ॥ ३६ ॥ पूर्वश्लोकोक्तंमननंचिरकालाभ्यस्तंसत्यं पुरुषार्थंसाधयती
७ त्याह ॥ ॥ एवंनिरंतरकृतावासनैब्रह्मैवास्मीतिवासना । हरत्यविद्याविक्षेपान्रोगानिवरसा
यनं ॥ ३७ ॥ एवमुक्तप्रकारेण ब्रह्मैवास्मीतिनैरंतर्येणचिरकालाभ्यस्तंवासनाऽवि
द्याकृतचित्तविक्षेपान्निःशेषतोनाशयति । यथारसायनमौषधंचिरकालसेवितंस
द्रोगंनिःशेषतोनाशयतितद्वदित्यर्थः ॥ ३७ ॥ ब्रह्मानुसंधानसाधनेनियममाह ॥ ॥
विविक्तदेशआसीनोविरागोविजितेंद्रियः ॥ भावयेदेकमात्मानंतमनंतमनन्यधीः
॥ ३८ ॥ विविक्तदेशेजनसंबंधवर्जितेदेशेआसीनःसुखोपविष्टःविरागःसर्वत्रगता
भिलाषः । अतएवविनिर्जितानिइंद्रियाणियेनसः अनंतमपरिछिन्नमद्वयमेक
मात्मानमनन्यधीः ब्रह्मपरावस्थितानिश्चयात्मिकाबुद्धिर्यस्यतादृशोभावयेद्ध्या
येत् ॥ ३८ ॥ दृश्येप्रपंचेजाग्रतिकथमेकत्वभावनासंभवतीत्यतआह ॥ ॥ आत्मन्येवा

खिलंदृश्यंप्रविलाप्यधियासुधीः ॥ भावयेदेकमात्मानंनिर्मलाकाशवत्सदा ॥ ३९ ॥ अखिलं
दृश्यजातंसुधीःशुद्धांतःकरणःसन्शुद्धयाधियाआत्मन्येवसमाधिसमये प्रविलाप्य प्रक
र्षेणनाशयित्वातदाद्वितीयाभावादेकमात्मानंसदाज्योत्स्नाकाशवद्भावयन्नवतिष्ठेत् ॥ ३९
परमार्थदर्शीमुनिर्नामरूपवर्णादिकंसर्वंविहायपरिपूर्णज्ञानानंदस्वरूपेणैवावतिष्ठत
इत्यतआह ॥ रूपवर्णादिकंसर्वंविहायपरमार्थवित् । परिपूर्णचिदानंदस्वरूपेणावति
ष्ठते ॥ ४० ॥ स्पष्टार्थोयंश्लोकः । ननुप्रमात्रादित्रिपुटीज्ञानंवर्त्तमानमुपलभ्यतेकथमेक
त्वभावनेत्याशंक्यपरमात्मनिभेदोनास्तीत्याह ॥ ज्ञातृज्ञानज्ञेयभेदःपरेनात्मनिविद्यते ।
परानंदैकरूपत्वाद्दीप्यतेस्वयमेवतत् ॥ ४१ ॥ ज्ञातृज्ञानज्ञेयभेदःपरमात्मनिनविद्यतेस
भेदःकल्पितआत्मन्येवभाति । ज्ञानानंदैकरूपत्वादात्मास्वयमेवदीप्यतिप्रकाशते ॥ ४१ ॥
एवंविशुद्धवस्तुध्यातुःप्रत्यक्षफलमाह ॥ एवमात्मारणौध्यानमथनेसततंकृते । उदिताव

आत्म° गतिश्चोलासर्वाज्ञानेंधनं दहेत् ॥ ४१ ॥ आत्मा अंतःकरणमेवारणिः तस्मान्मननमेवोत्
१० तरारणिः । ध्यानेन तयोर्मथनेन सर्वदा कृते तत्रोदिताज्ज्वालारूपा ज्ञानाग्निर्विद्या अज्ञान
मेवेंधनं मूलाज्ञानं विशेषतः सपरिवारं नाशयति । तदा मुमुक्षुः स्वाराज्येभिषिक्तः कृ
तकृत्यो भवतीत्यर्थः ॥ ४२ ॥ जीवपरमात्मनोरनन्यत्वैक्यज्ञानेनाविद्या परिकल्पितां
धतमसि निःशेषमपयाते सति परमात्मा स्वयमेवाविर्भवेदित्याह ॥ अरुणेनेव बो
धेन पूर्वं संतमसे हृते । तत आविर्भवेदात्मा स्वयमेवांशुमानिव ॥ ४३ ॥ अरुणप्रका
शेनादौ अंधकारक्षये अंशुमानिव यथाविर्भवति तद्वदात्मापीत्यर्थः ॥ ४३ ॥ आत्मा सर्व
दापरोक्षस्वभावत्वादप्राप्त इव स आत्मा कदा प्राप्तो भवेदिति शिष्याभिप्रायमाह ॥
आत्मा तु सततं प्राप्तोप्यप्राप्तवदविद्यया । तन्नाशे प्राप्तवद्भाति स्वकंठाभरणं यथा १०
॥ ४४ ॥ आत्मा सर्वत्र पूर्णः अद्वयानंदस्वरूपः सर्वदा प्राप्त एव अविद्यावशाद्भ्रांत्या अप्रा

प्त इवाभाति तदावरणाविद्यानाशे वाक्यश्रवणात्प्राप्त इवाभाति । कंठगतचामीकरन्यायादित्य
र्थः ॥ ४४ ॥ ननु जीवस्य परमात्मन्येवतत्वमयुक्तं जीवतत्वविरोधस्वभावस्यापरिहार्यत्वादि
त्यत्राह ॥ स्थाणौ पुरुषवद्भ्रांत्या कृता ब्रह्मणि जीवता । जीवस्य तात्विके रूपे तस्मिन्दृष्टे नि
वर्तते ॥ ४५ ॥ यथा अंधकारस्थिते स्थाणौ पुरुषोयमिति चोरशंकया बिभेति तथैवाविवा
रा ब्रह्मणि जीवत्वमारोप्यते तथा शास्त्रोपदेशजनितविवेकदृष्ट्या तस्य जीवस्य तात्वि
के रूपे लक्ष्ये तत्त्वंपदार्थे दृष्टे ज्ञानकल्पितत्वाज्जीवत्वमपि निवर्त्तते ब्रह्मैवाहमिति जाना
तीत्यर्थः ॥ ४५ ॥ अहंममेति प्रत्यये जाग्रति कथं नाहमिति प्रत्यय इत्याशंक्य तदपि त
वमेषेत्याह । तत्वस्वरूपानुभवादुत्पन्नं ज्ञानमंजसा । अहंममेति चाज्ञानं बाधते दिग्भ्रमं
यथा ॥ ४६ ॥ जीवपरयोरेकत्वादुत्पन्नं यज्ज्ञानं तदहंममेति अज्ञानं बाधते दिग्भ्रमादि
वदिति भानुदर्शनाभावादित्यर्थः ॥ ४६ ॥ अहंममेति प्रत्यये नष्टे योगी सम्यग्विवेकज्ञान

आत्म० वान्सन्नविवेकज्ञानेनचक्षुषासर्वदृश्यप्रपंचंस्वात्मन्येवानुभवेनपश्यतीत्याह॥ सम्य
११ ग्विज्ञानवान्योगीस्वात्मन्येवाखिलंस्थितं। एकंचसर्वमात्मानमीक्षतेज्ञानचक्षुषा ४७
नन्वात्मानंसर्वंभवतिप्रत्यक्षविरोधान्नानात्वेनदृश्यमानमिदंसर्वंकथमात्मन्यभेदे
टी नपश्यत्यत्राह॥ ॥आत्मैवेदंजगत्सर्वमात्मनोन्यन्नविद्यते। मृदोयद्वद्घटादीनिस्वा
त्मानंसर्वमीक्षते॥४८॥ इदंसर्वंजगत्सर्वदात्मैवात्मकार्यत्वादर्थतोन्यदात्मनोन
किंचिद्विद्यतेयथाघटशरावादिकंमृत्कार्यंमृदोत्पन्नंनास्ति अतःस्वात्मन्येवसर्वं
दृश्यजातंमभेदेनेक्षतेपश्यति। वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमि
तिश्रुतेः॥४८॥ एवंभूतास्येषाजीवन्मुक्तिरित्याह॥ जीवन्मुक्तस्तुतद्विद्वान्पूर्वोपा
धिगुणांस्त्यजेत्॥ सच्चिदानंदरूपत्वाद्भवेद्भ्रमरकीटवत्॥४९॥ अनाद्यविद्यापरि ११
कल्पितपूर्वोपाधिदेहमनबुद्ध्यादीन्गुणान्सत्वादीन्परित्यजेदिति। इयमेवजीव

न्न त्वादन्य ५

न्मुक्तिरित्युच्यतेसच्चिदानंदादिगुणकत्वाद्भ्रमरकीटवत्साक्षाद्ब्रह्मभवेत्प्राप्नोतीत्यर्थः।
४९॥ तत्वतस्तुआत्मारामःसुखंतिष्ठतीत्याह॥ ॥तीर्त्वामोहार्णवंहत्वारागद्वेषादि
राक्षसान्। योगीशांतिसमायुक्तआत्मारामोविराजते॥५०॥ मोहएवार्णवःअप
र्यंतत्वात्तंज्ञानप्लवेनतीर्त्वानिःशेषंनाशयित्वारागद्वेषादयएवराक्षसामोक्षपरि
पंथिनस्तान्निःशेषतोनाशयित्वाशांतिसमायुक्तःशमदमादिसहितःआत्मारा
मःआत्मनिआरामःक्रीडायस्यसविराजतेस्वाराज्येनाभिषिक्तःप्रकाशते॥ अ
त्रार्थांतरंध्वन्यते। श्रीरामाख्योआत्मारामःसमुद्रंतीर्त्वारावणादीन्राक्षसान्ह
त्वासीतैवशांतिस्तयाशांत्यासमायुक्तोविराजतेऽयोध्यायामिति॥५०॥ जीवन्मु
क्तस्यलक्षणमाह॥ बाह्यानित्यसुखासक्तिंहित्वात्मसुखनिर्वृतः। घटस्थदीपव
त्स्वस्थोअंतरेवप्रकाशते॥५१॥ बाह्येंद्रियविषयोद्भवाअनित्यसुखरतिंवासना

आत्म॰ हित्वात त्रहेतुरात्मा सुखेन निर्वृत्तः घटस्थदीपवदंतरेव प्रकाशते । स्वसाक्षिकमात्मानु
१२ भवसुखमिति तैर्न ज्ञायत इत्यर्थः ॥५१॥ एवमुक्तप्रकारेण जीवन्मुक्तः सन् प्रारब्धसंक्ष
३ यादेवं वर्ततेत्याह ॥ उपाधिस्थोपि तद्धर्मैर्नलिप्तो व्योमवन्मुनिः । सर्वविन्मूढवत्तिष्ठेद
सक्तो वायुवच्चरेत् ॥५२॥ देहोपाधौ साक्षित्वेन स्थितोपि मुनिर्व्योमवत्तद्धर्मैर्नानुलिप्तो मम
कर्मलेपो नास्तीति भावयेत् । सर्वज्ञोपि मूढवत्प्राकृतवत्तिष्ठेत्सर्वत्र विषयेषु यदृच्छया प्रा
प्तेषु अनासक्तः आसक्तिरहितः सन् वायुवच्चरेन्निर्गमेत् ॥५२॥ प्रारब्धकर्मक्षये देहोपा
धौ लीने विदेहकैवल्यमाह ॥ उपाधिविलयाद्विष्णौ निर्विशेषं विशेन्मुनिः । जले जलं
वियद्व्योम्नि तेजस्तेजसि वा यथा ॥५३॥ उपाधिभूतदेहविलये प्रारब्धकर्मसंक्षये मु
निर्योगी विष्णौ सर्वव्यापके परब्रह्मणि निर्विशेषं यथा भवति तथा विशेत् । अत्रैव दृ १२
ष्टांतः जले जलमित्यादि ॥५३॥ परब्रह्मणः सर्वातिशयत्वात्तत्स्वरूपं लक्षणेनाभिधत्ते
श्लो

श्लोकद्वयेन ॥ ॥यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखं । यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यव
धारयेत् ॥५४॥ यद्ब्रह्मसाक्षात्कारलाभादपरो लाभो न विद्यते सर्वलाभादीनां तत्रैवांतर्भूत
त्वाद्यथा ब्रह्मानंदे क्षुद्रानंदानामंतर्भावो यत्सुखाद्ब्रह्मानुभवसुखादपरं सुखं नास्ति निर
तिशयसुखत्वात् । यज्ज्ञानाद्ब्रह्मसाक्षात्कारज्ञानादपरं ज्ञानं नास्ति मोक्षहेतुत्वात्तद्ब्रह्मेत्य
वधारयेत् ॥५४॥ यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः ॥ यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्य
वधारयेत् ॥५५॥ यद्दृष्ट्वा परमन्यद्द्रष्टव्यं नास्ति तेनैव पुरुषार्थसिद्धत्वाद्यद्भूत्वा येनै
क्यं गत्वा पुनर्भवो जन्मादिकं नास्ति यज्ज्ञात्वा यत्स्वरूपं ज्ञात्वान्यज्ज्ञेयं नास्ति तद्
ब्रह्मेत्यवधारयेत् अन्यत्सर्वं वृथा पांडित्यमित्यर्थः ॥५५॥ तिर्यगूर्ध्वमधः सर्वत्र
ब्रह्मैव पूर्णमित्याह ॥ तीर्यगूर्ध्वमधः पूर्णं सच्चिदानंदमद्वयं ॥ अनंतं नित्यमेकं य
त्तद्ब्रह्मेत्यवधारयेत् ॥५६॥ तिर्यगूर्ध्वमिति स्पष्टार्थः । अतद्व्यावृत्तिरूपेणावेदां

आत्म० तैर्लक्ष्यते व्ययं॥ अखंडानंदमेकं यत्तद्ब्रह्मेत्यवधारयेत्॥ ५७॥ अखंडानंदमेकं ब्रह्म वेदांतैर
१२ तद्व्यावृत्तिरूपेण तन्निरसनेन ज्ञातव्यमित्याह। अतद्व्यावृत्तिरूपेणेति स्पष्टार्थः॥५७॥ ननु ब्र
ह्मादयोपि निरतिशयानंदिन एव श्रूयंते तत्राह॥ अखंडानंदरूपस्य तस्यानंदलवाश्रिताः॥
ब्रह्माद्यास्तारतम्येन भवंत्यानंदिनो लवाः॥५८॥ ब्रह्मेंद्राद्याः परिच्छिन्नानंदिन एव तु अखं
डानंदानुभवानंदरूपत्वादपरिच्छिन्नं आनंदमेव स्वरूपं यस्य तस्यानंदसमुद्रस्यानंदलेश
माश्रित्य ब्रह्मेंद्राद्यस्योप्यानंदिनो भवंति॥ आनंदतारतम्येन एतस्यैवानंदस्यान्यानि भूता
नि मात्रामुपजीवंतीति श्रुतेः परमप्रेमास्पदतया आत्मैव भातीत्युच्यते॥५८॥ एतदयु
क्तं अनात्मापि देहादिप्रपंचः प्रियतर अनुभूयत इत्याशंक्याह॥ तद्युक्तमखिलं वस्तु व्य
वहारस्तदन्वितः। तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले॥५९॥ अखिलं देहाद्यना १२
त्मावस्त्वपि तद्युक्तं तेनात्मना संयुक्तमेव प्रियतमं लौकिकोपि व्यवहारः तद्युक्तरूप एव

प्रियतरस्तस्मात्सर्वगतं ब्रह्मात्यंतप्रियं यथा क्षीरं सर्वं व्याप्य घृतमेवावस्त्वपि ब्रह्मव्याप्तत्वात्प्रियमेव
भाति अत आत्मैव प्रियतम इति सिद्धं॥५९॥ तर्हि आत्मा केन प्रकारेण सर्वं व्याप्य तिष्ठतीति
जानीयादित्याशंक्य साक्षाद्वक्तुमशक्यत्वात्। अनण्वस्थूलमिति श्रुतेः। सत्तारूपेणभा
तीत्याह॥ अनण्वस्थूलमह्रस्वमदीर्घमजमव्ययं। अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यव
धारयेत्॥६०॥ अनण्वस्थूलमिति स्पष्टार्थं पुनस्तद्ब्रह्मज्ञानार्थं श्लोकत्रयेण पृथक्
पृथक् निरूपयति॥ यद्भासा भास्यतेर्कादि भास्यैर्यत्तु न भास्यते। येन सर्वमिदं भाति
तद्ब्रह्मेत्यवधारयेत्॥६१॥ यद्वस्तु भासा दीप्त्या सर्वं भास्यं तत्तु भास्यैरर्कादिभिर्न भास्यते
। न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः। तमेव भांतमनुभाति
सर्वं यस्य भासा सर्वमिदं विभातीति श्रुतेः॥ येन सर्वमिदं भूतभौतिकं भावरूपं जगद्भा
ति तद्ब्रह्मेति जानीयात्॥६१॥ तप्तायःपिंडवत्स्वयमेवांतर्बहिर्व्याप्य भावयन्नखिलं

आत्म० ब्रह्मप्रकाशत इत्याह ॥ स्वयमंतर्गतं व्याप्य भावयन्नखिलं जगत् । ब्रह्म प्रकाशते वह्निः प्र
१४ तप्तायसपिंडवत् ॥ ६१ ॥ स्वयमंतर्गतमिति स्पष्टार्थः । पुनस्तदेवाह । सर्वं ब्रह्मैव सत्यं त
थापि जगद्रूपेण यदा पश्यति तदा न गृह्यते ॥ जगद्विलक्षणं ब्रह्म ब्रह्मणोन्यन्न किं
न्य चन । ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका ॥ ६२ ॥ जगद्वैलक्षण्यं न च कार्य
त्वेन विचार्यं तज्ज्ञातुं शक्यं ब्रह्मणोन्यन्न विद्यते । यदि ततोन्यद्दृश्यते यत्किंचित्तन्मि
थ्यैव मरुमरीचिकाजलवदित्यर्थः ॥ ६२ ॥ दृश्यते श्रूयते यद्यद्ब्रह्मणोन्यन्न किंचन ।
तत्वज्ञानाच्च तद्ब्रह्म सच्चिदानंदमद्वयं ॥ ६३ ॥ पुनस्तदेव स्फुटं निरूपयति । चक्षु
षा यद्दृश्यते श्रोत्रेण श्रूयते मनसा स्मर्यते यच्च वाचा पदमभिधीयते तत्वज्ञा
नात्सर्वं ब्रह्म सच्चिदानंदमद्वयं । ब्रह्मणोन्यन्न किंचिदित्यर्थः ॥ ६३ ॥ सर्वगं सच्चि १४
दात्मानं ज्ञानचक्षुर्निरीक्षते । अज्ञानचक्षुर्नेक्षेत भास्वंतं भानुमंधवत् ॥ ६४ ॥

न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा । ज्ञानप्रसादेन विशुद्धसत्वस्ततस्तु तं
पश्यति निष्कलंकं ध्यायमान इत्यादि । यदि सर्वगतं ब्रह्म तत्सर्वैः किं न दृश्यत इत्याशंक्य चक्षु
र्वाक्षिभिर्न गृह्यत इत्यन्वयाश्रुत्या प्रतिपादयति न चक्षुषेति चक्षुषा न पश्यति कश्चनैनं प्रका
शते यथाग्निना स्वर्णं औपाधिकं दुर्वर्णादिकं हित्वा स्वरूपेण प्रकाशते तद्वदित्यर्थः ॥ ६५
एवं शोधितो जीवः परमात्मा हृदयाकाशे उदितः सन् तमोज्ञानं उपसंहरन् भानुवत्सर्वं प्रकाश
ति इत्याह ॥ हृदाकाशोदितो ह्यात्मा बोधभानुस्तमोपहृत् । सर्वव्यापी सर्वधारी भाति
सर्वं प्रकाशते ॥ ६६ ॥ बोध एव भानुः सर्वस्याधारभूतत्वात्सर्वव्यापी सर्वधारी निःशेषं स्पष्टं
६६ ॥ नन्वात्मनो ज्ञानप्रतिबंधकदुरितपरिहारार्थं प्रयागादितीर्थयात्रोगंघो केन यामि
त्याशंक्याह । दिग्देशकालाद्यनपेक्ष्य सर्वगं शीतादिहृन्नित्यसुखं निरंजनं । यश्चात्मती
र्थं भजते विनिष्क्रियः स सर्ववित्सर्वगतोऽमृतो भवेत् ॥ ६७ ॥ यो विनिष्क्रियः परमहंसः

आत्म० स्वात्मतीर्थंभजतेससर्ववित्सर्वज्ञःसर्वगंपरमात्मस्वरूपत्वादमृतःमुक्तोभवेत्।कीदृशं
१५ तीर्थंदिग्देशकालादेरनपेक्षयैवसर्वगंशीतादिद्वंद्वदुःखानिहरतीतिशीतादिहृत्।नि
त्यसुखंमोक्षानंदप्रापकत्वात्।इतरतीर्थेषुतद्विपरीतंद्रष्टव्यं।तस्मादात्मतीर्थस्नातस्य
नकिंचिदवशिष्यतइतिभावः॥ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यगोविंदभ
गवत्पूज्यपादश्रीमच्छंकराचार्यविरचितंस्वात्मबोधप्रकरणंसटीकंसमाप्तं॥ ॥

Ṛgveda-Prātiśākhya.	Title
Śaunaka.	Author
	Editor
Śaka 1641	Year, Vols.
	Publisher
	Remarks

392.0.

परमं

॥श्रीगणेशाय नमः॥ ॐ परावरे ब्रह्मणि यं सराङ्गवेदा मानं वेदा निधिं मुनीन्द्रः ॥ तं पद्मगर्भं प्रणवं वादिदेवं प्रणम्य ऋचां लक्षणमाह शौनकः ॥१॥ अका
रकाराविउए ओ ऐ औ पदाद्यं तयोर्नलकारः स्वरेषु ॥ आकारादीन्दीर्घ ऋपान्हि तृतीयान् खेषु पंचस्वपि तानसंति ॥२॥ कखौ गघौ ङ· चछौ जझौ ञ
टठौ डढौ णस्तथौ दधौ नः ॥ पफौ बभौ मो यरलवा हशषसाः कं पङ्क्तिवर्णराशिः क्रमश्च ॥३॥ अष्टौ समानाक्षराण्यादितस्ततश्चत्वारि संध्य
क्षराण्युत्तराणि ॥ एते स्वराद्परादीर्घवल्लुप्तो नुस्वारो व्यंजनं वास्वरो वा ॥४॥ सर्वः शेषो व्यंजनान्येव तेषामाद्याः स्पर्शाः पंच ते पंचवर्गाः ॥ सतस्रो
तस्थास्ततउत्तरे चाऊष्माणोंत्याः सप्त तेषाम घोषाः ॥ वर्गे वर्गे च प्रथमाव घोषौ युग्मौ सोष्माणावनुनासिकोंत्यः ॥ तस्मादन्यमवसानेन तीप
गार्ग्यः स्पर्शं प्रथमं शाकटायनः ॥ ॐ जाङ्क्स्वाः सप्त मांताः स्वराणामन्ये दीर्घा उभये लक्षराणि ॥ गुरूणि दीर्घाणि तथेतरेषां संयोगानुस्वार
पराणि यानि ॥ अनुस्वारो व्यंजनं चाक्षरांगं स्वरांतरे व्यंजनान्युत्तरस्य ॥ पूर्वस्यानुस्वारविसर्जनीयौ संयोगादिर्वा चपरक्रमेद्ध ॥५॥ मात्राड्
स्वस्तावद्वयहांतरं द्वे दीर्घांत्स्विस्व ॥ प्लुतउच्यते स्वरः ॥ अधः स्विदासीदुपरिस्विदासीदर्थे प्लुतिर्भो रिव विंदती" ति ॥ स्वरभक्तेः पूर्वभाग क्षरां
गंद्राघीयसी सार्धमात्रेतरे च ॥ अर्धानान्यारऋसंज्ञोनुनासिकः संयोगस्तु व्यंजनसंनिपातः ॥ कंठ्यो कारः प्रथम पंचमौ च द्वावूष्माणौ के
चिदेताउरस्यौ ॥ ऋकारल्कारावथषष्ठऊष्मा जिह्वामूलीयाः प्रथमश्च वर्गः ॥ तालव्यावेकारचकारवर्गा विकारैकारौ यकारः शकारः ॥ मूर्ध
न्योषकारष्टकारवर्गो दंतमूलीयस्तु तकारवर्गः ॥ सकाररेफल्कारश्च रेफं वर्त्स्यमेके शोषओष्ठ्योपवाद्य ॥ नासिक्या नासिकयमानुस्वारा

नितिस्थानान्यत्रयमोपदेशः॥ ४ ॥ जिह्वामूलं तालु चाचार्य आह रुद्धा नं डकारस्य तु वेदमित्रः॥ द्वयोश्चास्य स्वरयोर्मध्यमेत्य संपद्यते स डकारो ळकारः॥ न
॥१॥ ल्हकारतामेति स एव चास्य ढकारः सन्नूष्मणा संप्रयुक्तः॥ इकासाञ्हा चात्र निदर्शनानि निवी डुंगड्येन दवथहेण॥ न्यायोर्मिश्रानपवादान्प्रतीयात्सर्व
शास्त्रार्थप्रतिकंठमुक्तं॥ स्थानं प्रश्लिष्टोपदेशः स्वराणां ह्रस्वादेशे [illegible] द्रस्वदीर्घसवर्णे॥ असावमुमिति तदावमुक्तं यथांतरं पारवक्रेवरेषान्॥
प्राक्कानार्षादिति करणात्पदांतास्तद्धकानां तेन ये संहितानां॥ सामवशाइति चेवापवादान्कुर्वीत यस्य संपद्यादस्तु तयोः॥ अप्रत्याम्नायपदवत्रप
यान्तेन तेन तोपाचरित क्रमस्वरान्॥ ५ ॥ अष्टावाद्यानवसाने प्रगृह्यानाचार्या आहुरनुनासिकान्स्वरान्॥ तत्त्रिमात्रे शाकलादर्शयंत्याचार्या॥
२ श्रो स्थापरिलोपहेतवः॥ नकारांदशनामिनः स्वराः पूर्वीनंतानभिषु नम्यमुत्तरो सहोपधारिफितएकवर्णवद्विसर्जनीयः स्वरघोषवत्परः॥ ओका
नआमंत्रित जःप्रगृह्येत पदं चान्यापूर्वपदांतगश्च षष्ठ्यादयश्च द्विवचांतभाजस्त्रयो दीर्घाः साप्तमिको च पूर्वौ॥ असमेयुष्मेते अमी च प्रगृह्या वर्जं ४
उपात्तमंनानुदात्तं न पद्यं कृकारश्चात करणेन पुकार को ऽस्टको द्राघितः शाकलेन॥ ऊष्मा रेफी पंचमो नामि पूर्वो महोपा [illegible] भिनरायथाके
॥अंतोदात्तमंतरे दिक्षा विपर्यये स्पर्श चाघः प्रसयेपूर्वपद्यः॥ ४ ॥ प्रातर्देवं भाव धरा यूदात्तं कस्तु दात्तमविभक्तदादः॥ स्वः प्रगाथमेनशक्रादि ॥२॥
वेकर पस्करस्सारुविपूर्वमस्तः॥ स्वः स्वरितनसमासांगमुत्तरं स्वरादेशो पूर्वपदेष्ववमेहः॥ अनर्थवं तिस्वरघोषवत्परं मूर्धन्यनिर्फेरूया
सोऽस्तणन्महीं॥ वरीवरे वरिति चैकपादे व्यपपूर्वाण्यसमासांगयोगे॥ पथ्याम घानी दिवि चक्षसा मरपूर्वो त्विषाऽतीत्यामानिरषुना॥ हा

तःसनितःपोतुर्नेष्टः सोतः सवितर्ने तिस्वसः॥ मातर्जनित भ्रातिरस्त्रातस्थातर्जीवित धातर्धर्त्तः॥ जामातर्दुहितर्दतः प्रशास्तर्वितः पित॥ दोषावस्त
रवस्पर्तः प्रयंतश्चेग्यमुत्तमं दीधर भावरी वरदर्द दर्दरदर्धरजागरजीगः॥ वारपुनःपुनरस्पर कस्पः सस्वरह सनुत सवरस्वा॥ ५ ॥ इति
प्रातिशाख्ये प्रथमाध्यायस्य प्रथमं पटलम्॥ ॥ संहितापदप्रकृतिः परांतान्पदादिभिः संदधदेति यत्सा॥ कालाव्यवायेन स्वरांतरं तु विवृत्तिः सा वास्वरभ
क्तिकाला॥ पदांतादिष्ववविकारशास्त्रं पदेदृष्टेषु वचनान्प्रतीयात्॥ पदं पदांतादि वदेकवर्णं प्रश्लिष्टमप्यानुपूर्व्ये यथासंधीन॥ एषस्य सच स्वराश्च पूर्वे भवंति
व्यंजनमुत्तरपदेभ्यः तन्वक्षरसंधयोनुलोमाः प्रतिलोमास्क विपर्ययेत एव॥ तत्र प्रथमास्तृतीयभावं प्रतिलोमेषु नियंस्यथतरेषु॥ ऊष्मापरिलुप्यते [illegible]
नयाणां स्वरवर्जं नितु यत्रतानि पद्या॥ पुरएतातितउ नाप्रउगं नमउक्तिभिः॥ अंतः पदं विवृत्तयोतान्याः पदसंधिषु॥ ४ ॥ समानाक्षरे सस्थाने दीर्घमेकमुभे स्वरं॥
इकारोदय एकारमकारः सोदयस्तथा॥ उकारोदय ओकारं परेष्वैकारमोजयाः॥ ओकारं यम्मयोरेते प्रश्लिष्टा नाम संधयः॥ समानाक्षरमंतस्थां स्वामकंठ्यं
स्वरोदयं॥ समानाक्षरस्वे स्वे तेक्षेप्राः प्राक्तवादयाः॥ विसर्जनीयो रिफितो दीर्घपूर्वस्वरोदयः॥ आकारमुत्तमो चद्वौ स्वरोनाः पदहृतयः॥ क्तस्वरवस्कसो
कारपूर्वो चापोत्तमात्स्वरो मउर्द्दहदीर्घपराउद्धाह पदहृतयः॥ २ ॥ आध्ययोन्योर्भर्गमनोध्ये वकारो त्वांतरागमः॥ ऋकारउदयेकयावकारं तदुद्धा
हवलं उद्धाहाणं पूर्वरूपाण्यकारि प्रकृत्याढ्ये आभेक्त्य कमाद्यं॥ प्राच्यपंचालपदहृत्तयस्ता४ पंचालाना मोध्यस्तवभवंति॥ अथाभिनिहितः संधिर्न
तेः प्राकृतवैकृतैः॥ एकी भवंति पादादि रकारस्तत्र संधिजः॥ अतः पाद मकाराव संहितायाल घोलेषु॥ यकारायक्षरं परं वकारायपि वा मेवत॥ अ
५२ न्यात्[illegible]पितथायुक्तमावीतोपहिता सतः॥ अ ययोविवृत्यते रकारः सर्वथा भवत्॥ ॥ वइत्येते नचानप्रकीचित्रः सविते वकः॥ पदेरूपाद्दि तेनेतेः स

वैरेवोदयाः परे ॥ अदादव त्रीं जनयंता व्यया अभेद्योपाश्रिरवं त्वं वीरत ॥ अभुमुन्क्ममतयेन शामहा ऽ अद्वत्वं वोवीरने वींस्यकोरथाः ॥ वासोवायो भिभुवकवषः संत्रं दनो धी
२ न वनः स्वधावः ॥ असार तन्नता वः सगर्भ्यो हिरण्यशृंग इति चोपधामिः ॥ ये २ रारायो धमे धायिनो हिरन्नेः मिदासांत ॥ आयमानो भवोन्त्रयं नृतापो होति घ्रिनि ॥ अभयं तोहिं
मनुतो मुभद्र श्यवसेगविषन्वयुनेजनिष ॥ द्वन्हस्येवीः समेरे तमानामरुतो मैदन्नमितो नवंत ॥ ४ ॥ श्रुवते ध्वं त्वंवसवान्विमेरप हृषिरेभ्रान कृषामस्तु रोमि नन ॥ उपतेधा वद
नेयं पमादिति जंतुषोयास ॥ विनो नुश्रियोधित ॥ वपुषे नु विशोयं तत्स्तं तो वयानिरेवनसः ॥ भरंतोत्स्यवोवों बुध्यो जो माथिनो धमः ॥ देवान यस्तुरुतसो सुरप्रा भ्रतामिन्त्रे
नेरुपस्तेन नोया ॥ येजामयस्तेर दन्नोधिवक्रीतिवर्ध ततेरुणोभिः सदोधि ॥ स्वाध्योजनयन्ध्नवनो भिमाती श्यनेपदहमनसो धियोध्वनः ॥ योद्यस्ते विंदं त्वपसो धि
नयोधिपादोस्य योति ब्राह्मणास्य योन यत् ॥ सोस्माकंयाद्वेषोभ्यो न्यक्रतेभ्यो स्तम्यो क्रंपयस्तं तो मृताश्च ॥ अन्योवांके थोद तिनोद येषुपुत्रः परा के नपरावते ॥ ५ ॥
श्वंतः पादं न्वयो अंतरिक्षेवयो अस्यां श्रियथयोहेतयस्त्रयः ॥ दो अंधसः शयवे अश्विनो भयेश्च वो अधिसा ग्ध्रीयोजामयः पयः ॥ प्रक्षयेति करणादोप्रगृह्या स्वरेषु चा
र्षां प्रथमो यथोक्तं ॥ सहोदयास्ताः प्रगृहीतपदोसर्वत्रैव न्यक्षरांतास्त्र नेवे ॥ आर्थमिवसंध्यय कारपूर्वो विहतेश्च प्रत्ययः सल्लुकारः ॥ ऊकारादो स्थितिप्रेप्सयकारे
नचेनदेकासरतन्नपूर्वे ॥ अह्वासखाङ्गी सुशमी स्वधोमीस्थश्रयी पृथिवीषामनीषा ॥ अथानिङ्गाथ्या प्रेतिसत्त्वरणां मुख्येपरेप्सं नमषध्यथोश्च ॥ स्वरेपादादाउऽय्येस
नेतिष्यं तंजोषं नवर्षणी श्चर्षणिभ्यः ॥ एकारांतमिन्नयोरस्मदी वन्नभुमस्युरिस्कपधं वेत्यपृक्तं ॥ ६ ॥ एकारोकारपरो नवके थो लुशादवी गोतमे चामिनंत ॥ विभ्वाविध
तोविधन्यास्कदायामानेत्स्र कारेप्सया दादिभाजि ॥ परुश्चेपमीषापथेसकारए वों अग्निमान्नि पुसाल्लु तोपधा ॥ सचादयोयाभिहिताविलनयः ॥ क्रतोपधांता अनुना
सिकोपधाः ॥ सेदु साम्मिन्नेमभिसाभिवेगः सेरभवः सोपमासोषधीरनु ॥ सास्मा अरं सोतनः सेंद्र विश्वा सेतिसास्माकमनवयसास ॥ सेदग्नेसदग्निर्वासि २

घंसास्माकेभिः सेदुयः सेमे ॥ सेनासेनं सेमं सोदं चं सेमां सोषांसे शेसेदीशे ॥ नृइत्था तेसानो अयेवो अस्मे वासोवेदयस्यां ॥ धिस्येमेनन् अन्यन्नांच त्यादादोनइद्रोसर्वांक ॥
॥ २ ॥ उरु अयान्त्रजोषितंधनं त्रीं शतवं संदशो पापदशोण्ये ॥ यथो हि वेयथा चिषदशोणिंस्वरोदयं पिबाइमं रथोध्व ॥ वीरासप्टतनतम अकृण्वंस्तत्वरि वप्रेषपुरोदसीम ॥
धन्वर्णसः सरपसः सेवोतप्रधीववीवृक्तसर्तवाजौ ॥ अश्विनेवपीवो पवसर्गानो महो आदित्यां उपसामिवेतयः ॥ स्तोतवअंथं नस्त्जा इयध्येसवेंद्रसानो अर्यमस्व
धामिना ॥ गोओपशागोनजीकृप्रवादोमनीषा आत्वापृथिवीजनयोः ॥ मनीषावस्यू रणायाइहावबृहतीइवेति नपथाग्रहीतं ॥ योनिमारेगगादारेगोरेगुर्योणा आवण
कृहंत्यासद्भुपश्चाक्षिपतमनायुधासआसता ॥ ७ ॥ अस्त्वासतोनरा विध्यदभ्यादिवं क आसतः ॥ न्यावणक्रीरादेवोन्याविध्येदेनमायुनक्र ॥ अहिहत्वारिणकथ
आयुक्षातामुदावता ॥ रिष्यमास्थ्युनक्ता कुत्सवणमाहिणि ॥ श्रुनश्चिछेपं निदितं नराशंसं पूषणं ॥ नराशंसं देव्यं ता अनानुपूर्व्यं संहिता ॥ यतोदीर्घस्ततो दीर्घा
विस्तयोह्रस्वयस्तम यतः स्वरः स्वराः ॥ प्राच्यपंचाल उपधानिभो दयाः शाकल्यस्य रूक्षविरस्येतरास्थितिः ॥ - ॥ इति प्रातिशाख्ये द्वितीयं पटलम् ॥ ॥ उदात्तश्चा
नुदात्तश्च स्वरितश्च त्रयः स्वराः ॥ आयामविस्रंभाक्षेपैस्त उच्यंतेक्षराश्रयाः ॥ एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः ॥ तस्योदात्ततरोदात्तादर्धमात्रार्धमेव वा ॥ यो
अनुदात्तः परः शेषः स उदात्तः श्रुतिर्न चेत् ॥ उदात्तं वोच्यते किंचित्स्वरितं वाक्षरं परं ॥ उदात्तपूर्वं स्वरितमनुदात्तं परेक्षरं ॥ अतोन्यत्स्वरितं स्वारं जात्यमाचक्षते पदे ॥ अभ
व्यांतुपरं विधात्ताभ्यामुदात्तमक्षरं ॥ अनुदात्तोदये पुनः स्वरितं स्वरितोपधे ॥ इकारयोश्च प्रश्लेषे क्षैप्राभिनिहितेषु च ॥ उदात्तपूर्वरूपेषु शाकल्यस्यैवमाचरेत् ॥
